श्रीगणेशायनमः ओन्नमोभगवतेवासुदेवाय नारायणःपरोव्यक्तोदंडमव्यक्तसंभवं अंडस्यो
तस्मिंमेलोकाःसप्तद्वीपाचमेदिनी १ सभगवानसृष्टेदंजगत्तस्यस्थितिंचिकीर्षुर्मरीच्यादीन
प्रसृष्टाप्रजापतीन्प्रवृत्ति लक्षणंधर्मंग्राहयामासवेदोक्तंततोन्यांश्चसनकसनंदनादीनुषी
घनिवृत्तिलक्षणंधर्मंज्ञानवैराग्यादिलक्षणंग्राहयामास द्विविधोहिवेदोक्तोधर्मः प्रवृत्ति
लक्षणोनिवृत्तिलक्षणश्चजगतःस्थितिकारणंप्राणिनांसाक्षादभ्युदयनिःश्रेयसहेतुर्यःस
धर्मोब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्चानुष्ठीयमानोऽदीर्घेणकालेनानुष्ठातृणांकामाद्वा
द्दीयमानेविवेकविज्ञानहेतुकेनाधर्मेणाभिभूयमानेधर्मेप्रवर्द्धमानेचाधर्मेजगतःस्थितिं
परिपिपालयिषुःसत्राद्रिकर्त्तानारायणाख्योविष्णुर्भौमस्यतद्धीनत्वाद्वर्णाश्रमेतरा
सचभगवान्ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिःसदासंपन्नस्त्रिगुणात्मिकांवैष्णवीस्वामा
यांप्रकृतिंवशीकृत्याजोऽव्ययोभूतानामीश्वरोनित्यशुद्धबुद्धमुक्तस्वभावोपिसन्स्वमायया
देहवानिवजातइवलोकानुग्रहंकुर्वन्नुलक्ष्यतेस्वप्रयोजनाभावेपिभूतानुजिघृक्षयैवे
दैकंहिधर्मंद्वयंअर्जुनायशोकमोहमहोदधौनिमग्नायोपदिदेशागुणाधिकैर्हिगृहीतो
नुष्ठीयमानोधर्मःप्रचयंगमिष्यतीतिनंधर्मंभगवतोपदिष्टंभगवान्वेदव्यासोःसर्वज्ञोभगी

तार्थ्यःसप्तभिःश्लोकशतैरुपनिबंधनदिदंगीताशास्त्रंसमस्तवेदार्थसारसंग्रहभूतंदुर्वि
ज्ञेयार्थतदर्थविष्करणार्थंसंक्षेपतोविवरणंकरिष्यामि तस्यास्यगीताशास्त्रस्यसंक्षेपतःप्र
योजनंपरंनिश्रेयससहेतुकस्यसंसारस्यात्यंतोपरमलक्षणंतच्चसर्वकर्मसंन्यासपूर्वका
दात्मज्ञाननिष्ठारूपाद्धर्माद्भवतितथेममेवगीतार्थंधर्मंमुद्दिश्यभगवतेते सहिधर्मःसुपर्णो
मांब्रह्मणःपरंवेदनइत्यनुगीतासुकिंचान्यदपितंत्रेवोक्तं नैवधर्मीनचाधर्मीनचैवहिंसु
भाशुभी यस्यैकासंनिलीनस्तूष्णींकिंचिदचिंतयन् ज्ञानंसंन्यासलक्षणमितिच इ
हापिचोक्तमर्जुनायसर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेति अभ्युदयार्थोपियःप्र
वृत्तिलक्षणोधर्मोवर्णानाश्रमांश्चोद्दिश्यविहितःसदेवादिस्थानप्राप्तिहेतुरपिसन्नीश्व
रार्पणबुध्यानुष्ठीयमानःसत्त्वशुद्धयेभवति फलाभिसंधिवर्जितःशुद्धसत्त्वस्यचज्ञाननि
ष्ठायोग्यतापाप्तिद्वारेणज्ञानोत्पत्तिहेतुत्वेनचनिश्रेयसहेतुत्वमपिप्रतिपद्यते तथाचे
ममर्थमभिसंधायवक्ष्यति ब्रह्मण्याधायकर्माणियोगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धय

इति इमंद्विःप्रकारंधर्मंनिःश्रेयसप्रयोजनंपरमार्थतत्त्वंवासुदेवाख्यंचपरंब्रह्माभिधे
यभूतंविशेषतोभिव्यंजयद्विशिष्टप्रयोजनसंबंधाभिधेयवद्गीताशास्त्रंयतस्तदर्थविज्ञा
नेसमस्तपुरुषार्थसिद्धिर्भवतीतद्विवरणेयत्नःक्रियतेमया अत्रचदृष्ट्वानुपांडवानीकमि
त्यारभ्ययावन्नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवेत्येतदंतःप्राणिनांशोकमोहादि
संसारदुःखबीजभूतदोषोद्भवकारणंहेतुप्रदर्शनार्थत्वेनव्याख्येयोग्रंथः तथात्वर्जुने
नराज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबंधिबांधवेषुहमेतेषांममेतइत्येवंप्रत्ययनिमित्त
स्नेहविच्छेदादिनिमित्तावात्मनःशोकमोहौप्रवर्त्तितौ कथंभीष्ममहंसंख्येइत्यादि
नाशोकमोहाभ्यांत्यभिभूतविवेकज्ञानःस्वतएवक्षत्रधर्मेयुद्धेप्रवृत्तोपितस्माद्युद्धा
दुपरराम परधर्मंचभिक्षाजीवनादिकंकर्तुंप्रवर्तते तथाचसर्वप्राणिनांशोकमोहादि
दोषाविष्टचेतसांस्वभावतएवस्वधर्मपरित्यागःप्रतिषिद्धसेवाचस्यात् स्वधर्मेप्रवृत्ता
नामपितेषांवाङ्मनःकायादीनांप्रवृत्तिःफलाभिसंधिपूर्वैकेवसाहंकाराभवति तत्रेवं

सतिधर्माधर्मोपचयादिष्वनिष्टजन्ममरणसुखदुःखसंप्राप्तिलक्षणःसंसारोनुपरतोभवतीत्यतःसंसा
रबीजभूतोशोकमोहौतयोश्चसर्वकर्मसंन्यासपूर्वकादात्मज्ञानान्नान्यतोनिवृत्तिरितितदुपदिदिक्षुः
सर्वलोकानुग्रहार्थमर्जुननिमित्तीकृत्यभगवान्वासुदेवोऽशोच्यानित्यादि तत्रकेचिदाहुः सर्वकर्म
संन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेवकेवलात्केवल्यनप्राप्यतएव किंतर्हिअग्निहोत्रादिश्रौत
स्मार्तकर्मसहितात्ज्ञानात्केवल्यप्राप्तिरितिसर्वासुगीतासुनिश्चितोर्थइति ज्ञापकंचाहुः अस्यार्थ
स्य अथचेत्वंधर्म्यंइमंसंग्रामंनकरिष्यसि कर्मण्येवाधिकारस्ते कुरुकर्मैवतस्मात्वमित्यादिहिं
सादियुक्तत्वादेदिकंकर्मोयेतीयमप्यात्रांकानकार्या कथंक्षात्रंकर्मयुद्धलक्षणंगुरुभ्रातृपुत्रादि
हिंसालक्षणंअत्यंतक्रूरमपिस्वधर्मइतिकृत्वानाधर्मोयतत्करणेचततःस्वधर्मकीर्त्तिंचहित्वापा
पमवाप्यसीतिब्रुवतायाज्ञिकादिनिचोदितानांपश्वादिहिंसालक्षणानांचकर्मणांप्रागेवनाधर्म
त्वमितिसुनिश्चितमुक्तंभवतीति तदसत् ज्ञानकर्मनिष्ठयोर्विभागवचनाद्द्विद्वयाश्रययोः
अशोच्यानित्यादिनाग्रंथेनभगवतायावत्स्वधर्मंमपिचावेक्ष्येत्येतदंतेनग्रंथेनयत्परमार्थात्मत
त्वंनिरूपंकृतंतत्संन्यस्तद्विषयाबुद्धिरात्मनोजन्मादिविक्रियाभावादकर्तृत्वंतत्प्रकरणार्थंनि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रूपणाद्याज्ञायतेसासांख्येबुद्धिः सायेषामुचिताभवतिनेसांख्याः एतस्याबुद्धिर्जन्मनःप्रभृ॥ अ०१
तनोदेहादिव्यतिरिक्तस्यकर्तृत्वमोक्तृत्वापेक्षोधर्माधर्मविवेकपूर्वकोमोक्षसाधनानुष्ठाननि
रूपणलक्षणोयोगस्तद्विषयाबुद्धियोगेबुद्धिः सायेषांकर्मिणामुचिताभवतिनेयोगिनस्तथात्व
भगवताविभक्तेद्वेबुद्धीनिर्दिष्टेएषानेभिहितासांख्येबुद्धियोगेत्विमांशृण्वति तयोश्चसांख्य
बुध्याश्रयांज्ञानयोगेननिष्ठांसांख्यानांविभक्तांवक्ष्यति पुरावेदात्मनाभयाप्रोक्तेति तथाचयोग
बुध्याश्रयांकर्मयोगेननिष्ठांविभक्तांवक्ष्यति कर्मयोगेनयोगिनामित्येवंसांख्यबुद्धियोगबुद्धिंचा
श्रित्यद्वेनिष्ठेविभक्तेभगवतोक्तज्ञानकर्मणोःकर्तृत्वानेकत्वैकत्वबुध्याश्रययोरेकपुरुषाश्रय
त्वासंभवोपपद्यतायथैतद्विभागवचनंतथैतद्दर्शितं ब्राह्मणेएतमेवप्रव्राजिनोलोकमिच्छंतः
प्रव्रजंतीतिसर्वकर्मसन्यासंविधायतत्रैषेकिंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइति
तत्रैवचप्राग्दारपरिग्रहात्पुरुषआत्माप्राक्तोधर्मजिज्ञासोत्तरकालंलोकत्रयसाधनंपुत्रेद्वि॥ श्रीशंकर
प्रकारंचवित्तंमानुषंदैवंचमानुषंकर्मरूपंपितृलोकप्राप्तिसाधनंविद्यांचदैवंवित्तंदेवलोकप्रा २
प्तिसाधनं सोकामयतेत्यविद्याकामवतएवकर्माणिश्रौतादीनिदर्शितानितेभ्योव्युत्थानमात्मा

नमेवलोकमिच्छतोऽकामस्यविहितंतदेतद्विभागवचनमनुपपन्नंस्याद्यदिश्रौतकर्मज्ञानयोःस
मुच्चयोऽभिप्रेतःस्यात् नचार्जुनस्यप्रश्नउपपद्योज्यायसीचेत्कर्मणस्तद्दृष्ट्वाहिरेकपुरुषानुष्ठेय
त्वासंभवंबुद्धिकर्मणोर्भगवतापूर्वमनुक्तंकथमर्जुनेनाक्तंबुद्ध्यकर्मणोज्यायस्त्वंभगवत्यध्यारो
पयेन्मृषैवज्यायसीचेत्कर्मणस्तेमताबुद्धिरिति किंच यदिबुद्धिकर्मणोःसर्वेषांसमुच्चयउक्तः
स्यादर्जुनस्यापिसउक्तएवेति यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितंइतिकथमन्यतरविष
यएवप्रश्नःस्यात् नहिपित्तप्रशमनार्थिनोवैद्येनमधुरस्नानंचभोक्तव्यमित्यपदिष्टेनयोरन्य
तरपित्तप्रशमकारणंब्रूहिइतिप्रश्नःसंभवत्यर्जुनस्यभगवदुक्तार्थविवेकानवधारणनिमित्तः
प्रश्नःकल्पेत नथापिभगवताप्रश्नानुरूपंप्रतिवचनंदेयंमयाबुद्धिकर्मणोःसमुच्चयउक्तःकि
मर्थंदृश्यंत्वंश्रोतोसीतिनतुपुनःप्रतिवचनमनुरूपंपृष्टादन्यदेवदेवनिष्ठमयापुराप्रोक्तेइतिवक्तुंयुक्तं
नापिस्मार्तेनैवकर्मणाबुद्धेःसमुच्चयोऽभिप्रेतःविभागवचनादिसर्वमनुपपन्नंस्यात् किंच क्षत्रि
यस्ययुद्धंस्मार्तंस्वधर्मइतिजानतः तत्किंकर्मणिघोरेमांनियोजयसिकेशवेत्युपालंभोऽनुपपन्न
स्तस्मान्नगीताश्रुतिस्मृतिन्यायेष्वन्यत्रापिश्रौतेनस्मार्तेनवाकर्मणाऽत्मज्ञानस्यसमुच्चयःकेनचिदपि

दर्शयितुंशक्योयस्यत्वज्ञानार्थैरागादिदोषतोवाकर्मणिप्रवृत्तस्ययोनदानेननपसावाविशुद्धसत्व
स्यज्ञानमुत्पन्नंपरमार्थतत्वविषयमेकमेवेदंसर्वंब्रह्मात्मैवकर्तृचेतितस्यकर्मणिकर्मप्रयोजनेचानिष्ट
त्तेपिलोकसंग्रहार्थंयत्नपूर्वंयथाप्रवृत्तस्तथैवप्रवृत्तस्यकर्मणियत्प्रवृत्तिरूपंदृश्यतेननत्कर्मयेन
बुद्धेःसमुच्चयःस्याद्यथाभगवतोवासुदेवस्यक्षत्रधर्मेचेष्टतंनज्ञानेनसमुच्चीयतेपुरुषार्थसिद्ध
येनतद्वत्फलाभिसंध्यहंकारभावस्यतुल्यत्वाद्विदुषस्तत्वविद्विनाहंकरोमीतिमन्यते नचफलमभि
संधत्ते यथाचस्वर्गादिकामार्थिनोऽग्निहोत्रादिकाम्यसाधनानुष्ठानायाहिताग्नेःकाम्यएवाग्नि
होत्रादेःप्रवृत्तस्यसामिकृतेविनष्टेपिकामेतत्देवाग्निहोत्राद्यनुतिष्ठतोपिननत्काम्यमग्निहोत्रादि
भवतिनथादर्शयतिचभगवान् कुर्वन्नपिनकोरोतिनलिप्यतेइतितत्र यच्चपूर्वैःपूर्वतरंकृतंक
र्मैवहिसंसिद्धिमास्थितोजनकादयइतितत्रप्रविभज्यविज्ञेयं तत्कथं यदितावत्पूर्वेजनका
दयस्तत्वविदोप्रवृत्तकर्माणःस्युस्तेलोकसंग्रहार्थंगुणागुणेषुवर्त्तन्तेइतिज्ञानेनसंसिद्धिमा
स्थिताःकर्मसंन्यासेनाप्यधिकर्मणासंहैवसंसिद्धिमास्थिताःनकर्मसंन्यासंकृतवन्तइत्यर्थः
अथनतेतत्तत्वविदःईश्वरसमर्पितेनकर्मणासाधनभूतेनसंसिद्धिंसत्वशुद्धिंज्ञानोत्पत्तिंलक्षा

णंवासंसिद्धिमास्थिताजनकादयइतिव्याख्येयं एतमेवार्थंवक्ष्यतिभगवान्सत्वशुद्ध्येकर्मकुर्वंति स्वकर्मणात
मभ्यर्चंसिद्धिंविंदतिमानवइत्युक्त्वासिद्धिंप्राप्तस्यज्ञाननिष्ठांवक्ष्यति सिद्धिंप्राप्तोयथाब्रह्मेत्यादिना तस्मा
त्तासुकेवलात्देवतत्वज्ञानान्मोक्षप्राप्तिर्नकर्मसमुच्चितादितिनिश्चितोर्थोयथाचायमर्थस्तथाप्रकरण
शोविभज्यतत्रतत्रप्रदर्शयिष्यामः तत्रधर्मसंमूढचेतसोमहतिशोकसागरेनिमग्नस्यार्जुनस्यान्यत्रा
त्मज्ञानादुद्धरणमपश्यन्भगवान्वासुदेवस्तंततोर्जुनमुद्दिधारयिषुरात्मज्ञानायावतारयन्नाह अशो

अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे गतासूनगतासूंश्चनानुशोचंतिपंडिताः ११

च्यानित्यादिना नशोच्याऽशोच्याभीष्मद्रोणादयःमहत्तत्वात्परमार्थरूपेणनित्यताचनानशोच्यान
न्वशोचोनुशोचितवानसि तेम्रियंतेमच्चिमित्तमहंतैर्विनाभूतःकिंकरिष्यामिराज्यसुखादिनेति तंप्र
ज्ञावतांबुद्धिमतांवादांश्चवचनानिचभाषसेतद्दर्शन्मोढ्यंपांडित्यंचविरुद्धमात्मनिदर्शयसुन्मत्तइवेत्यभि
प्रायोयस्माद्गतासूनगतप्राणान्मृतान् अगतासूनगतप्राणान्जीवतश्चनानुशोचंतिपंडिताःआ
त्मज्ञाः पंडितविषयाबुद्धिर्येषांतेहिपंडिताः पांडित्यंनिर्विचेतिश्रुतेः परमार्थस्तुनित्यानशोच्यानशो

कुतस्तेऽशोच्यायतोनित्याः कथं नतुएवज्ञातुकस्याचिद्देहनाशेकिंत्वात्मेवातीतेषुदेहोत्पत्तिविनाशेषु
नित्यएवाहमात्मेत्यभिप्रायः तथानत्वंनासीःकिंत्वासीरेव तथानेमेजनाधिपाःनासन्किंत्वासन्ने
व तथाचैवंनभविष्यामःकिंतुभविष्यामएवचसर्वेवयमतोस्माद्देहविनाशात्परमुत्तरकालेपित्रि
ष्वपिकालेषुनित्यात्मस्वरूपेणेत्यर्थः देहभेदानुवृत्त्याबहुवचनेनात्मभेदाभिप्रायेणतत्रकथमि
व नित्यआत्मेतिदृष्टांतमाह १२ देहिनोदेहोस्तीतिदेहीतस्यदेहिनोदेहवतआत्मनोऽस्मिन्व

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचैवनभविष्यामःसर्वेवयमतःपरं १२
देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति १३ त्व

र्त्तमानेदेहेयथायेनप्रकारेणकौमारंकुमारभावोबाल्यावस्थायौवनंयूनोभावोमध्यावस्थाजराप्रयो
गानिर्जीर्णोवस्थेत्येतास्तिस्रोवस्थाअन्योन्यविलक्षणास्तासांप्रथमावस्थानाशेननाशोद्वितीयाव
स्थोपजनेनोपजनआत्मनःकिंतर्हिअविक्रियस्यैवद्वितीयांतृतीयावस्थाप्राप्तिरात्मनोदृष्टायथा तथा श्रीशंकर
थातद्वदेवदेहादन्योदेहोदेहांतरंतस्यप्राप्तिर्देहांतरप्राप्तिरविक्रियस्यैवात्मनइत्यर्थः धीरोधीमां ५
स्तत्रैवंसतिनमुह्यतिनमोहंप्राप्नोति १३ यद्यथात्मनोऽन्यनिमित्तोमोहोनसंभवतिनित्यत्वा

त्मनिविज्ञानतःतथापिशीतोष्णसुखदुःखप्राप्तिनिमित्तोमोहोलौकिकोदृश्यतेसुखवियोगनिमित्तोदुःखसं
योगनिमित्तश्चशोकइत्येतदर्जुनस्यवचनमात्रंक्याह मात्राइति मात्राआमिर्मीयंतेज्ञायंतइतिश्रो
त्रादीनींद्रियाणिमात्राणांस्पर्शाःशब्दादिभिःसंयोगास्तेशीतोष्णसुखदुःखदाःशीतउष्णंसुखदुःखं
चप्रयच्छंति अथवास्पृश्यंतइतिस्पर्शाःशब्दादयोविषयामात्राश्चस्पर्शाश्चशीतोष्णसुखदुःखदाः
शीतंकदाचित्सुखंकदाचिद्दुःखं तथोष्णमपित्रनियतरूपं सुखदुःखेपुननंनियतरूपतांव्यभिचर

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः आगमापायिनोनित्यास्तांस्तितिक्षस्वभारत १४
यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ समदुःखसुखंधीरंसोमृतत्वायकल्पते १५

तोतस्ता
भ्यांपृथक्शीतोष्णयोर्ग्रहणं यस्माच्चेमात्रास्पर्शादयः आगमापायिनः आगमापायशीलास्तस्मा
दनित्याःउत्पत्तिविलयरूपत्वादतस्तानूशीतोष्णादीस्तितिक्षस्वतेषुहर्षविषादंचमाकार्षीरित्यर्थः
१४ यंहीति यंहिपुरुषंसमदुःखसुखंसमेदुःखसुखेयस्यतंसमदुःखसुखंसुखदुःखप्राप्तौहर्षवि
षादरहितंधीरंधीमंतंनव्यथयंतिनचालयंति नित्यात्मदर्शनादेतेयथोक्ताःशीतादयःसनित्या
त्मदर्शननिष्ठाद्वंद्वसहिष्णुरमृतत्वायामृतभावायमोक्षायेत्यर्थः कल्पतेसमर्थोभवति १५

इतश्चशोकमोहावरुत्वाशीतोष्णादिसहनंयुक्तंयस्मात् नासतेति नासतोऽविद्यमानस्यशीतोष्णादेःस
कारणस्यनविद्यतेनास्तिभावोभवनमस्तिता नहिशीतोष्णादिसकारणंप्रमाणैर्निरूप्यमाणंवस्तुसंभ
वति विकारोहिसःविकारश्चव्यभिचरति यथाघटादिसंस्थानंचक्षुषानिरूप्यमाणंमृद्व्यतिरेकेणानु
पलब्धेरसत्तथासर्वोविकारःकारणव्यतिरेकेणानुपलब्धेरसत् जन्मप्रध्वंसाभ्यांप्राग्ऊर्ध्वंचानुपलब्धे
मृदादिकारणस्यचतत्कारणव्यतिरेकेणानुपलब्धेरसत्वं तदसत्वेसर्वाभावप्रसंगइतिचेन्न सर्व
त्रबुद्धिद्वयोपलब्धेःसद्बुद्धिसंरेडुरिति यद्विषयाबुद्धिर्नव्यभिचरतितत्सद्यद्विषयाबुद्धिर्व्यभिचरति

नासतोविद्यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः १६

तदसदिति सदसद्विभागेबुद्धितंत्रेस्थितेसर्वत्रहबुद्धीसर्वैरुपलभ्येते समानाधिकरणेननीलोत्प
लवत्सनूघटःसनूपटःसनूहस्तीत्येवंसर्वत्रतयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरतिनथापटादिर्नतुसद्बुद्धिस्त
स्माद्घटादिबुद्धिविषयोऽसन्नतुसद्बुद्धिविषयोऽव्यभिचारात् घटेविनष्टेघटबुद्धेर्व्यभिचरंतींसद्बु
द्धिरपिव्यभिचरतिइतिचेन्न घटादावपिसद्बुद्धिदर्शनाद्विशेषणविषयैवसासद्बुद्धिः सद्बुद्धिर्व
द्घटबुद्धिरपिघटांतरेदृश्यतइतिचेन्न पटादावदर्शनात्सद्बुद्धिरपिनष्टेघटेनदृश्यतइतिचेवि
शेष्याभावात्सद्बुद्धिर्विशेषणविषयासतीविशेष्याभावेविशेषणानुपपत्तौकिंविषयास्यान्नतु

पुनःसद्बुद्धेर्विषयाभावेऽधिकरणत्वंघटादिविशेष्याभावेनयुक्तमितिचेन्नेदमुदकमितिमरीच्या
दावन्यतराभावेपिसामानाधिकरण्यदर्शनात्तस्माद्देहादेर्हृदयचसकारणस्यासतोऽवनविद्यते
भावइति तथासतआत्मनोऽभावोऽविद्यमानतानविद्यते सर्वत्रव्यभिचारादित्यवोचाम ए
वमात्मानात्मनोःसदसतोरुभयोरपिदृष्टउपलब्धोर्निर्णयः सत्तेदंवादसदसदेवेतिनुत्र
नयोर्योक्तयोस्तत्त्वदर्शिभिस्तदितिसर्वनामसर्वंचब्रह्मतस्यनामनस्तितन्नावस्तत्त्वंब्रह्मणो
याथात्म्यंतद्दृष्टंत्रीलंयेषांतेतत्त्वदर्शिनस्तैस्तत्त्वदर्शिभिः त्वमपितत्त्वदर्शिनांदृष्टिमाश्रित्स

अविनाशितुतद्विद्धियेनसर्वमिदंततं विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति १७

शोकंमोहंचहित्वाशीतोष्णादीस्तितिक्षस्वेत्यभिप्रायः १६ किंपुनस्तत्सद्यत्सदेवसर्वदेत्युच्य
ते अविनाशीति अविनाशिनविनष्टुंशीलंअस्येतिनुशब्दोऽसत्ताविशेषणार्थस्तद्विद्धिजानी
हि किं येनसर्वमिदंततंव्याप्तं सदाख्येनब्रह्मणासाकाशेनाकाशेनेवघटादेर्विनाशम
दर्शनमभावमव्ययस्यनेतत्सदाख्यंब्रह्मस्वेनरूपेणव्येतिनिरवयवत्वादाकाशवन्नाप्यात्मी
यैश्चनात्मीयभावाद्यथादेवदत्तोधनहान्यावेतिनेत्येवंब्रह्मव्येति अतोऽव्ययस्यास्यब्रह्मणो
विनाशंनकश्चित्कर्तुमर्हति नकश्चिदात्मानंविनाशयितुंशक्नोतीश्वरोप्यात्माहिब्रह्मस्वात्म

किंपुनस्तदसद्यत्स्वात्मसत्तांव्यभिचरतीत्युच्यते अन्तवंतइति अन्तवंतोंतोविनाशोयेषांतेऽन्तवंतः यथामृगतृष्णिकादिसद्बुद्धिरनुवृत्ताप्रमाणनिरूपणातेविच्छिद्यतेसतस्यांतत्तथाऽमेदेहादिः स्वप्नमायादेहादिवच्चांतवंतः नित्यस्यशरीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोंतवंइतेत्युक्तविवेकिभिरित्यर्थः नित्यस्यानाशिनइतिनपुनरुक्तं नित्यस्यैवद्विविधत्वालोकेनाशस्य च यथादेहोभस्मीभूतोऽदर्शनंगतोनष्टइत्युच्यतेविद्यमानोप्यन्यथापरिणतोव्याध्यादियुक्तोज्ञातोनष्टउच्यते तन्नानाशिनोनित्यस्यैतद्विविधेनापिनाशेनासंबद्धस्यैत्यर्थः अन्यच्च

अन्तवंतइमेदेहानित्यस्योक्ताःशरीरिणः अनाशिनोऽप्रमेयस्यतस्माद्युध्यस्वभारत १८

शाश्वतस्यादिवदनित्यत्वंस्यादात्मनस्तन्माभूदितिनित्यस्याविनाशिनइत्याह अप्रमेयस्यनप्रमेयस्यप्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्येतत् नन्वागमेनात्मापरिच्छिद्यतेप्रत्यक्षादिनाचपूर्वं नह्यात्मनःस्वतःसिद्धत्वात्सिद्धेत्वात्मनिप्रमातरिप्रमित्सोःप्रमाणान्वेषणाभवति नहिपूर्वंमित्थमहमित्यात्मानंअप्रमायपश्चात्प्रमेयपरिच्छेदायप्रवर्त्तते नत्वात्मानामकस्यचिद्दृष्टसिद्धोभवति शास्त्रंत्वत्यंप्रमाणमतद्धर्माध्यारोपिणनिवर्त्तकत्वेनप्रमाणत्वमात्मनि प्रपद्यतेनत्वज्ञातार्थज्ञापकत्वेन तथाचश्रुतिः यत्साक्षादपरोक्षाद्ब्रह्मयआत्मेति यस्मा

नत्वत्रयुद्धकर्त्तव्यतांविधीयते युद्धेप्रवृत्तएवत्वंसोऽयंकमोहप्रतिबद्धस्तूष्णींआस्तेऽतस्तस्यकर्त्तव्यप्रतिबंधापनयमात्रंभगवताक्रियतेनतस्माद्युध्यस्वेतिअनुवादमात्रंनविधिः शोकमोहादिसंसारकारणनिवृत्त्यर्थंगीताशास्त्रंनप्रवर्त्तकमित्येतत्सार्थस्यसाक्षिभूतेऋचावानिनाय भगवान् यस्त्वमन्यसेयुद्धभीष्मादयोमयाहन्यंतेअहमेतेषांहंतेत्येषाबुद्धिर्मृषैवते कथं यएनमिति यएनंप्रकृतिंवेत्तिविजानातिहंतारंहननक्रियायाःकर्तृभूतंयश्चैनमन्योम

यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतं उभौतौनविजानीतोनायंहंतिनहन्यते १९

न्यतेहतंदेहहननेनहतोहमितिहननक्रियायाःकर्मभूतंतावुभौनविजानीतोनज्ञातवंतौ विवेकेनात्मानंहंताहंहतोहमितिदेहहननेआत्मानमहंप्रत्ययविषयंयोजानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः १९ यस्मान्नायमात्माहंतिनहननक्रियायाःकर्त्तानचहन्यते नचकर्मभवतीत्यर्थः विक्रियतानुक्यंऊविक्रियस्यात्मा इतिद्वितीयोमंत्रः नजायतेति नजायतेनोत्पद्यतेऽनिलक्षणावस्तुविक्रियानात्मनोविद्यतइत्यर्थः तथानम्रियतेवा

वाशब्दस्यार्थेनम्रियतेर्यंचेत्यविनाशलणोंशेविक्रियाप्रतिषिध्यते कदाचिच्छब्दःसर्वविक्रिया
प्रतिषेधेःसंबध्यते नकदाचिज्जायतेनकदाचिन्म्रियतइत्येवंयस्मात्यमात्माभूत्वाभवनक्रियाम
नुभूयपश्चादभवितृभावंगतानभूयःपुनस्तस्मान्नम्रियते योहिभूत्वानभवतिसवैम्रियतइ
त्युच्यतेलोके वाशब्दान्नवाशब्दाच्चयमात्माऽभूत्वाभवितेहवन्नभूयःपुनस्तस्मान्नजायते
योह्यभूत्वाभवितासजायतइत्युच्यते नैवमात्माऽतोजायते यस्मादेवंतस्मादजोनित्य
श्च यद्येष्याद्यंतयोर्विक्रिययोःप्रतिषेधेसर्वोविक्रियाःप्रतिषिद्धाभवंति तथापिमध्यभावि

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः अजोनित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे २० नानांविक्रियाणांस्वशब्दैरेवप्रतिषेधःकर्त्तव्य
इत्यनुक्तानामपियौवनादिसमस्तविक्रियाणांप्रतिषेधोयथास्यादित्याह शाश्वतइत्यादि
शाश्वतइत्यपक्षयलणाविक्रियाप्रतिषिध्यते शाश्वद्भवःशाश्वतोनापक्षीयते स्वरूपेणनिरवय
वत्वान्निर्गुणत्वाच्चनापिचगुणक्षयेणापक्षयः अपक्षयविपरीतापिवृद्धिर्लक्षणाविक्रियाप्रति
षिध्यतेपुराणइति योह्यवयवागमेनोपचीयतेसवर्धतेअभिनवइतिचोच्यते अयंत्वात्मानिरव
यत्वात्पुरापिनवएवेतिपुराणोनवर्द्धतइत्यर्थः तथानहन्यतेनविपरिणम्यतेहन्यमानेपिवि
परिणम्यमानेपिशरीरे रुतिरत्रविपरिणामार्थोदृष्टोऽपुनरुक्तत्वायेनविपरिणमतइत्यर्थः

यएनंवेत्तिहंतारमित्यनेनहननक्रियायाःकर्त्ताकर्मचनभवतीतिप्रतिज्ञायनजायतइत्येनेनाविक्रियत्वंहेतु
मुक्त्वाप्रतिज्ञातार्थमुपसंहरति वेदेति वेदविजानातिअविनाशिनंअस्यभावंविकाररहितं नित्यंवि
परिणामरहितंयोवेदेतिसंबंधः एनंपूर्वोणमंत्रेणोक्तलक्षणमजमव्ययमुपजनक्षयरहितंकथं
केनप्रकारेणसविद्वान्पुरुषोधिरुतोहंतिहननक्रियांकरोतिकथंघातयतिहंतारंप्रयोजयतिनक
थंचिद्धंतिनकथंचिद्घातयतीत्यभयत्राक्षेपएषएवार्थःप्रश्नासंभवाद्धिरित्यर्थस्याविक्रियत्वस्यतुल्य
त्वाद्विदुषःसर्वकर्मप्रतिषेधएवप्रकरणार्थोभिप्रेतोभगवतोहंतेत्याक्षेपउदाहरणार्थेनेनविदु
षःकंकर्मसंभवेहेतुर्विद्वांसंपश्यन्कर्माण्याक्षिपतिभगवान्कथंसपुरुषइति ननूक्तएवात्मनो
ऽविक्रियत्वेकर्मोऽसंभवकारणविद्वांसःसत्यमुक्तंनतुसकारणविद्वांसोन्यत्वाद्विदुषोऽविक्रिया
त्मनइतिनत्यविक्रियंस्वाणुंविदितवतःकर्मनसंभवतीतिचेन्नविदुषआत्मत्वान्नदेहादिसं
घातस्यविद्वत्ता अतःपरिशेषादसंहतआत्माविद्वानविक्रियइतितस्यविदुषःकर्मासंभवा
क्षेपोयुक्तः कथंसपुरुषइति यथाबुध्याद्यात्मतत्त्वाद्यर्थस्याविक्रियएवसन्बुद्धिरस
विवेकविज्ञानेनाविद्ययोपलभ्यात्मकल्प्यतेएवमेवात्मानात्मविवेकविज्ञानेनबुद्धिरसावि
द्ययाऽसत्यरूपयापरमार्थतोविक्रियएवात्माविद्वानुच्यते विदुषःकर्मासंभवचनानिचा
कर्माणिशास्त्रेणविधीयंते तान्यविदुषोविहितानीतिभगवतोनिश्चयोगम्यते ननुविद्यापि

अविदुषएवविधीयतेविदितविद्यस्यपिष्टपेषणवत्तद्विद्याविधानानर्थक्यात्तत्राविदुषःकर्माणिविधीयं
तेनविदुषइतिविशेषोनोपपद्यते नानुष्ठेयस्यभावाभावविशेषोपपत्तेःअग्निहोत्रादिविध्यर्थ
ज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं कर्त्ताहममकर्त्तव्यमित्ये
वंप्रकारविज्ञानवतोऽविदुषोयथानुष्ठेयंभवतिनतुतथानजायतइत्याद्यात्मस्वरूपविध्यर्थज्ञानो
त्तरकालभाविकिंचिदनुष्ठेयंभवतिकिंतुनाहंकर्तानभोक्तेत्यात्मैकत्वाकर्त्तृत्वविषयज्ञानादन्य
नोत्पद्यतइत्येषउपपद्यते यःपुनःकर्त्ताहमितिवेत्यात्मानंतस्यममेदंकर्त्तव्यमित्यवश्यंभावि
नीबुद्धिःस्यात्तदपेक्षयासोधिकृतइतितंप्रतिकर्माणिसचाविद्वानुभौतौनविजानातइतिवचना
त् विशेषितस्यचविदुषःकर्मक्षेपवचनात्कथंसपुरुषइति तस्माद्विदुषोमुमुक्षोश्चसर्वक
र्मसन्यासएवाधिकारः अतएवभगवान्नारायणःसांख्यान्विदुषोऽविदुषश्चकर्मिणोविज्ञेयेन्
निष्ठेग्राहयति ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामिति तथाचपुत्रायाहभगवान्व्या
सः द्वौमावथपंथानावित्यादि तथाचक्रियापथश्चैवपुरस्तात्पश्चात्संन्यासश्चेत्येतमेवविभागंपु
नःपुनर्दर्शयिष्यतिभगवान् अतत्त्वविदहंकारविमूढात्माकर्त्ताहमितिमन्यते तत्त्ववित्तुनाहं
करोमीति तथाचसर्वाकर्माणिमनसासन्यस्यास्तेसुखइत्यादि तत्रकेचित्पंडितंमन्यावदंतिज
न्मादिषड्भावविशिष्टक्रियारहितोऽविक्रियोऽकर्त्तैकोहमात्मेतिनकस्यचिज्ज्ञानमुत्पद्यतेयस्मिन्

सतिसर्वकर्मसन्यासउपदिश्यते ननज्ञायतइत्यादिशास्त्रोपदेशानर्थक्यप्रसंगात्यथाचशास्त्रोपदे
शासामर्थ्याद्धर्माधर्मास्तित्वविज्ञानंकर्तुश्चदेहांतरसंबंधविज्ञानमुत्पद्यतेशास्त्रात्तस्यैवात्मनोऽवि
क्रियत्वाकर्तृत्वैकत्वादिविज्ञानंकस्मान्नोत्पद्यतइतिप्रष्टव्यास्ति करणगोचरत्वादितिचेन्न मनसैवानुद्र
ष्टव्यमितिश्रुतेः शास्त्राचार्योपदेशाश्रमादिसंस्कृतमनआत्मदर्शनेकरणं तथातदधिगमाया
नुमानेआगमेचसतिज्ञानेनोत्पद्यतेइतिसाहसमेतत् ज्ञानंचोत्पद्यमानंतद्विपरीतमज्ञानमव
श्यंबाधतइत्यभ्युपगंतव्यं नचाज्ञानदर्शिनं हंताहंनोस्मीत्यभीतोनविजानातीत्यत्रचात्मनोह

वेदाविनाशिनंनित्यंयएनमजमव्ययं कथंसपुरुषःपार्थकंघातयतिहंतिकं २१

ननक्रियायाःविक्रियावान्हिकर्त्तात्मनःकर्मभूतमन्यंप्रयोजयति कुर्विति तदेतदविशेषेणविदु
षःसर्वक्रियासुकर्तृत्वंहेतुकर्तृत्वंचप्रतिषेधतिभगवान्कर्माधिकाराभावप्रदर्शनार्थंवेदाविनाशिनं
कथंसपुरुषइत्यादिना कथंपुनर्विदुषोधिकारइत्येतदुक्तंपूर्वमेवज्ञानयोगेनसांख्यानामिति तथास
र्वकर्मसन्यासंवक्ष्यतिसर्वकर्माणिमनसासन्यस्येत्यादिना ननुमनसेतिवचनान्मानसानांका
यिकानांचसन्यासइतिचेन्नसर्वकर्माणीतिविशेषितत्वान्मानसानामेवसर्वकर्मणामितिचेन्नमनो
व्यापारपूर्वकत्वादाकाय्यव्यापाराणांमनोव्यापाराभावेनुपपत्तेः शास्त्रीयाणांवाकायकर्माणांका
रणानिमानसानिवर्जयित्वाऽन्यानिसर्वकर्माणिमनसासन्यस्यास्तइतिनमैवंकुर्वन्नकारय

DR. BHAU DAJI MEMORIAL

नितिविशेषणात्सर्वकर्मसन्यासोभगवतोक्तोमरीष्यतोनजीवतइतिचेन्ननवद्वारेपुरेदेहीआस्तेइति विशेषणानुपपत्तेः नहिसर्वकर्मसन्यासेनमृत्तस्यतद्देहेआसनंसंभवति अकुर्वतोऽकारयत स्वदेहेसन्यस्येतिसंबंधोनदेहआस्तइतिचेन्नसर्वत्रात्मनोऽविक्रियत्वावधारणाद्दासनक्रिया याश्चाधिकरणापेक्षलात्तद्दर्शनेक्षलाच्चसन्यासस्यसंपूर्वस्तन्यासश्चाद्दस्यागार्थोनिक्षेपा र्थः तस्माद्गीताशास्त्रेआत्मज्ञानवतःसन्यासेएवाधिकारोनकर्मणीतत्रतत्त्वोपरिष्टादात्मज्ञा

वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोपराणि तथात्मा
रीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही २२ शांकर

नप्रकरणेदर्शयिष्यामः २१ प्रकृतंतुवक्ष्यामः तत्रात्मनोऽविनाशित्वंप्रतिज्ञातंतत्किमि वेत्युच्यते वासांसीति वासांसिवस्त्राणिजीर्णानिदुर्बलतांगतानियथालोकेविहायपरि त्यज्यचानेन्यभिनवानिगृह्णातिउपादत्तेनरःपुरुषोपराण्यन्यानि तथातद्वदेवशरीरा णिविहायजीर्णानिअन्यानिसंयातिसंगतिनवानिदेहीआत्मापुरुषवदविक्रियएवेत्यर्थः २२ श्रीगुरुशंकराचार्यायनमोनमः श्रीलक्ष्मीनारायणायनमोनमः श्रीशंकर

कस्मादविक्रियएवेत्याह नैनमिति नएनंप्रकृतंदेहिनंछिंदंतिशस्त्राणि निरवयवत्वान्नावयवविभा गंकुर्वंतिशस्त्राण्यस्यादीनि तथानैनंदहतिपावकोग्निरपिनभस्मीकरोति तथानैनंक्लेदयंत्यापोपि हिसावयवस्यवस्कनआर्द्रीभावकरणेनावयवविश्लेषापादनेसामर्थ्यंतन्निरवयवेआत्मनिसंभवतिवे तथास्नेहद्रव्यंस्नेहशोषणेननाशयतिवायुरेवमेनमात्मानंनशोषयतिमारुतोपि २३ यतएवंतस्मा त् अछेद्योयमिति यस्मादन्योन्यनाशहेतुभूतानिजात्मानंनाशयितुंनोत्सहंते तस्मान्नित्योनित्यता त्सर्वगतःसर्वगतत्वात्स्थाणुःस्थाणुरिवस्थिरइत्येवंस्थिरत्वाच्चलःअयमात्माअतःसनातनश्चि

नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः नचैनंक्लेदयंत्यापोनशोषयतिमारुतः २३
अछेद्योयमदाह्योयमक्लेद्योशोष्यएवच नित्यःसर्वगतःस्थाणुरचलोयंसनातनः २४

रंतनोनकारणाकुतश्चिन्निष्पन्नोऽभिनवइत्यर्थः नेतेषांश्लोकानांपौनरुक्त्यंचोदनीयं यतएके नैवश्लोकेनात्मनोनित्यत्वमविक्रियत्वंचोक्तंनजायतेम्रियतेचेत्यादिनातत्रयदेवात्मविषय किंचिदुच्यतेनदेतस्मात्श्लोकार्थान्नातिरिच्यते किंचिच्छस्त्रैःपुनरुक्तंकिंचिदर्थतइतिदुर्बो धलाद्दात्मवस्कनैःपुनःपुनःप्रसंगमापाद्यापाद्यशास्त्रांतरेणतद्देववस्तुनिरूपयतिभगवान्वासु देवः कथंनुनामसंसारिणांबुद्धिगोचरमापन्नंसंसारनिवृत्तयेस्यादिति २४ शांकर श्री

किंच अव्यक्तेति अव्यक्तः सर्वकारणाविषयत्वान्नव्यज्यतेऽत्यव्यक्तोयमात्मा तस्मादचिंत्योयं यद्धींद्रिय
गोचरंतच्चिंताविषयमापद्यतेअयमात्मानिरिंद्रियगोचरत्वादचिंत्योऽविकार्योयं यथाक्षीरंदध्यादि
चनादिनाविकारिणोतथायंचनिरवयवत्वाच्चाविक्रियोनहिनिरवयवंकिंचिद्विक्रियात्मकंदृष्टंअ
विक्रियत्वादविकार्योयमात्मोच्यते तस्मादेवंयथोक्तप्रकारेणैनमात्मानंविदित्वात्वंनानुशोचि
तुमर्हसिहंताहमेषांमयेमेहन्यंतइति २५ आत्मनोऽनित्यत्वभ्युपगम्येदमुच्यते अथेति अथचे

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि २५
अथचैनंनित्यजातंनित्यंवामन्यसेमृतं तथापित्वंमहाबाहोनैवंशोचितुमर्हसि २६
जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच तस्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि २७

व्याख्यातमर्थः एनंप्रकृतमात्मानंनित्यजातंलोकप्रसिध्याप्रत्यनेकशरीरोत्पत्तिंजातोजातइति
वामन्यसे तथाप्रतितद्विनाशंनित्यंवामन्यसेमृतंमृतोमृतइति तथापि त्वंतथाभाव्यात्मनिम
हाबाहोनैवंशोचितुमर्हसि जन्मवतोनाशवतोजन्मनाशस्यावश्यंभावित्वात् २६ तथासति
जातस्येति जातस्यहिलब्धजन्मतोध्रुवोऽव्यभिचारीमृत्युर्मरणंध्रुवंजन्ममृतस्यच तस्माद
परिहार्योयंजन्ममरणलक्षणोर्थः तस्मिन्नपरिहार्येर्थेनत्वंशोचितुमर्हसि कार्यकारणसंघाता

यतः अव्यक्तादीनीति अव्यक्तमदर्शनमनुपलब्धिरादिर्येषांपुत्रमित्रादिकार्यकरणसंघातात्मका
नांतान्यव्यक्तादीनिभूतानिप्रागुत्पत्तेरुत्पन्नानिचप्राग्मरणाद्यक्तमध्यान्यव्यक्तनिधनान्येवपु
नरदर्शनेनिधनंमरणंयेषांतान्यव्यनिधनानिमरणादूर्ध्वमप्यव्यक्तत्वमेवप्रतिपद्यंतइत्यर्थः
तथाचोक्तं अदर्शनादापतितःपुनश्चादर्शनंगतइति तत्रकापरिदेवनाकोवाप्रलापः अदृष्ट
दृष्टनष्टभ्रांतिभूतेषुभूतेष्वित्यर्थः [illegible] २८ दुर्विज्ञेयोयंप्रकृतआत्माकिंतामेवैकमुपा

अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवना २८
आश्चर्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः आश्चर्यवच्चैनमन्यःशृ
णोतिश्रुत्वाप्येनंवेदनचैवकश्चित् २९ लभेसाधारणेभ्रांतिनिमित्तेकथंदुर्विज्ञेयआत्मे

साह आश्चर्यवदिति आश्चर्यवदाश्चर्यमदृष्टपूर्वमकस्माद्दृश्यमानंतेननुल्यमाश्चर्यवदा
श्चर्यमिवैनमात्मानंपश्यति कश्चिदाश्चर्यवदेववदति तथैवचान्यः आश्चर्यवच्चैनमन्यः
शृणोति श्रुत्वादृष्ट्वाप्येनंवेदनचैवकश्चित् अथवायोयंआत्मानंपश्यति सआश्चर्य
तुल्योवदति यश्चशृणोति सोनेकशतसहस्रेषुकश्चिदेवभवति अतोदुर्बोधआत्मेत्यभि

अथैतदनीप्रकरणार्थमुपसंहरियते देहीति सर्वस्यप्राणिजातस्यदेहेवध्यमानेप्ययंदेहीनवध्योयस्मात्त
स्माद्भीष्मादीनिसर्वाणिभूतान्युद्दिश्यनत्वंशोचितुमर्हसि इहपरमार्थतलापेक्षायांशोकोमोहोवान
संभवतीत्युक्तं ३० नकेवलंपरमार्थतलापेक्षायामेव स्वधर्ममपि स्वधर्मःक्षत्रियस्य
युद्धंतमप्यवेक्ष्यत्वंनविकंपितुंप्रचलितुंअर्हसि स्वाभाविकाद्धर्मादात्मस्वभावादित्यभिप्रायः तच्च
युद्धंपृथिवीजयद्वारेणापधर्मार्थंचेतिपरधर्म्यंतस्माद्धर्म्याद्युद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३१ हि

देहीनित्यमवध्योयंदेहेसर्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ३०
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३१ य
दृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं ३२
अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मकीर्तिंचहित्वापापमवाप्स्यसि ३३

यस्मात्कृतश्चत्यकृत्यंकर्त्तव्यमित्युच्यते यदृच्छयेति यदृच्छयाचाप्रार्थितमागतमुपपन्नंस्वर्गद्वारं
अपावृतंउद्घाटितमेतादृशंयुद्धंलभंतेक्षत्रियाःहेपार्थकिंनसुखिनस्ते ३२ एवंकर्त्तव्यताप्राप्तम
पि अथचेति अथचेत्त्वमिमंधर्म्यंधर्मोदनपेतंसंग्रामंयुद्धंनकरिष्यसिचेत्ततस्तदकरणात्स्वध
र्मकीर्त्तिंचमहादेवासमागमनिमित्तांहित्वाकेवलंपापमवाप्स्यसि ३३ श्रीशंकराचार्यायनमः

नकेवलंस्वधर्मकीर्तिपरित्यागः अकीर्तिमिति अकीर्तिंचापिभूतानिकथयिष्यंतितेऽव्ययांदीर्घकालं
धर्मोसाभूरइत्येवमादिभिर्गुणैःसंभावितस्यचाकीर्त्तिर्मरणादतिरिच्यते संभावितस्यचाकीर्त्तेर्व
रंमरणमित्यर्थः ३४ किंच भयादिति भयात्कर्णादिभ्योरणाद्युद्धादुपरतंनिवृत्तंमंस्यंतेत्वां
तयिष्यंतिनरूपयंतितांमहारथाःदुर्योधनप्रभृतयः येषांत्वंबहुमतोबहुभि
र्गुणैःर्युक्तइत्येवंमतोभूत्वापुनस्त्वंयास्यसिलाघवंलघुभावं ३५ किंच अवाच्य

अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ३४
भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं ३५
अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३६
हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७

वादानिति अवाच्यवादानवक्तव्यान्वादांश्चबहूननेकप्रकारान्वदिष्यंतितवाहिताः त्वत्रयोनिंदंतः
कुत्सयंस्तवतवदीयंसामर्थ्यंतस्मात्ततोनिंदाप्राप्तेर्दुःखाद्दुःखतरंनुकिंततःकष्टतरंदुःखंनास्ती
त्यर्थः ३६ युद्धेपुनःक्रियमाणेकर्णादिभिः हतइति जेष्यामिशत्रुंमरिष्यामिवेतिनिश्चयंकृ

अथेदानीं प्रकरणार्थमुपसंहियते देहीति सर्वस्यप्राणिजातस्यदेहेवध्यमानेप्ययंदेहानवध्योयस्मात्त स्माद्भीष्मादीनिसर्वाणिभूतान्युद्दिश्यनत्वंशोचितुमर्हसि इहपरमार्थतलापेक्षायांशोकोमोहोवान संभवतीत्युक्तं ३० नकेवलंपरमार्थतलापेक्षायामेव स्वधर्ममपिस्वधर्मःक्षत्रियस्य युद्धंतमप्यवेक्ष्यत्वंनविकंपितुंप्रचलितुंअर्हसि स्वाभाविकाद्धर्मादात्मस्वभावादित्यभिप्रायः तच्च युद्धंपृथिवीजयद्वारेणापवर्गार्थंचेतिपरंधर्म्यंतस्माद्धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३१ हि

देहीनित्यमवध्योयंदेहे सर्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ३०
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयान्यत्क्षत्रियस्यनविद्यते ३१ य
दृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं ३२
अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ३३

यस्मात्कृत्स्नंयत्कर्तव्यमित्युच्यते यदृच्छयेति यदृच्छयाचाप्रार्थितमागतमुपपन्नंस्वर्गद्वारं अपावृतंउद्घाटितमेतादृशंयुद्धंलभंतेक्षत्रियाःहेपार्थकिंनसुखिनस्ते ३२ एवंकर्तव्यतापक्षमपि अथचेति अथचेत्त्वमिमंधर्म्यंधर्मादनपेतंसंग्रामंयुद्धंनकरिष्यसिचेत्ततस्तदकरणात्स्वध र्मंकीर्त्तिंचमहादेवासमागमनिमित्तांहित्वाकेवलंपापमवाप्स्यसि ३३ श्रीशंकराचार्यायनमः

द्वि०२

श्रीशंकर १२

देहीनित्यमवध्योयंदेहे सर्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ३०
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयान्यत्क्षत्रियस्यनविद्यते ३१ य
दृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं ३२
अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ३३

नकेवलंस्वधर्मकीर्तिपरित्यागः अकीर्तिमिति अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययांदीर्घकाल धर्मोसाम्प्रइत्येवमादिभिर्गुणैःसंभावितस्यचाकीर्त्तिर्मरणादतिरिच्यते संभावितस्यचाकीर्त्तेर्व रंमरणमित्यर्थः ३४ किंच भयादिति भयात्कर्णादिभ्योरणाद्युद्धादुपरतंनिवृत्तंमंस्यंतेत्वां तयिष्यंतिनहृपयेतित्वांमहारथाःदुर्योधनप्रभृतयः येषांत्वंबहुमतोबहुमि र्गुणैःयुक्तइत्येवंमतोबहुमतोभूत्वापुनस्त्वंयास्यसिलाघवंलघुभावं ३५ किंच अवाच्य

अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ३४
भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं ३५
अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३६
हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७

वादानिति अवाच्यवादानवक्तव्यान्वादांश्चबहूननेकप्रकारान्वदिष्यंतितवाहिताःत्रात्रयोनिंदंतः कुत्सयंस्तवतवदीयंसामर्थ्यंतस्मात्ततोनिंदाप्राप्तेर्दुःखाद्दुःखतरंनुकिंततःकष्टतरंदुःखंनास्ती त्यर्थः ३६ युद्धेपुनःक्रियमाणेकर्णादिभिः हतइति जेष्यामित्वांहंतुंमरिष्यामिवेतिनिश्चयंकृ

तत्रस्वधर्मइत्येवंयुध्यमानस्योपदेक्ष्यामिमंशृणु सुखदुःखेति सुखदुःखेसमेकृत्वातुल्येकृत्वारागद्वेषा
वकृत्वाइत्येतत्तथालाभालाभौजयाजयौचसमौकृत्वाततोयुद्धाययुज्यस्वघटस्वनैवंयुद्धंकुर्वन्नपा
पंअवाप्स्यसि एषउपदेशःप्रासंगिकःश्लोकमोहापनयायलौकिकोन्यायःस्वधर्मंमपिचावेक्ष्यसा
यः श्लोकेरुक्तोनतुतात्पर्येनिभावः ३८ परमार्थदर्शनंविरुद्धंकृतंतच्चोक्तमुपसंहरत्येषाते
भिहितेतिशास्त्रविषयविभागप्रदर्शनायइहहिप्रदर्शितेशास्त्रविषयविभागेउपरिष्टात्
ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामितिनिष्ठाद्वयविषयंशास्त्रंसुखंप्रवर्त्तिष्यतेश्रोतार

सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यति ३८
एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु बुध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ३९

श्चविषयभागेनसुखंग्रहीष्यंतीत्यतआह एषातेति एषातेतुभ्यंभिहितोक्तासांख्येपरमा
र्थेवस्तुविवेकविषयेबुद्धिर्ज्ञानमाश्रावोकमोहादिसंसारहेतुदोषनिवृत्तिकारमेवोच्यमानांबु
द्धिंशृणु तांबुद्धिंस्तोनिप्रशंसनार्थंबुध्याययायोगविषययुक्तोहेपार्थकर्मबंधंकर्मबंधर्मोध
र्मोरूंबधंःकर्मबंधःतंप्रहास्यसीश्वरप्रसादनिमित्तकज्ञानप्राप्त्यभिप्रायः ३९ श्रीशं
कराचार्यायनमोनमः श्रीलक्ष्मीनारायणायनमोनमः श्रीसांबशिवायनमः

किंचान्यत् नेति नेहमोक्षमार्गेयोगेःभिक्रमणनाशोःभिक्रमणमभिक्रमःप्रारंभःतस्यनाशोनास्ति य
थाकृष्यादेर्योगविषयेप्रारंभस्यनानैकांतिकफलत्वमित्यर्थः किंच नापिचिकित्सावत्प्रत्यवायोविद्यते
किंतुभवतिस्वल्पमप्यस्ययोगधर्मस्यानुष्ठितंत्रायतेरक्षतिमहतःसंसारभयात्जन्ममरणादिलक्षणा
त् ४० येयंसांख्येबुद्धिरुक्तायोगेचवक्ष्यमाणलक्षणासा व्यवसायात्मिकेति व्यवसायात्मिकानिश्च
यस्वभावैकेवबुद्धिःइतरविपरीतबुद्धिशाखाभेदस्यबाधिकासम्यक्प्रमाणजनितत्वाद्हिश्रेयोमार्गेह

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ४०
व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुद्धयोव्यवसायिनां ४१

कुरुनंदन याःपुनरितराबुद्धयोयासांशाखाभेदप्रचारवशादनंतोपारोनुपरतःसंसारोनित्यप्रततो
भवति प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरतास्वनंतभेदबुद्धिषुसंसारोप्युपरमते तावु
द्धयोवहुशाखावह्यःशाखायाशांताःबहुशाखाबहुभेदाइत्येतत् प्रतिशाखाभेनत्वनंताश्चबु
द्धयः केषांअव्यवसायिनांप्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः ४१ श्रीमच्छंकराचा
र्यगुरवेनमः श्रीलक्ष्मीनारायणायनमः श्रीसदाशिवायनमः श्रीरामचंद्रायनमः

येषांव्यवसायात्मिकाबुद्धिर्नास्तितेके यामिमांवाचंप्रवदंत्यविपश्चितः वेदवादरताः पार्थनान्यदस्तीतिवादिनः ४२ कामात्मानः स्वर्गपराजन्मकर्मफलप्रदां क्रियाविशेषबहुलांभोगैश्वर्यगतिप्रति ४३

येषांव्यवसायात्मिकाबुद्धिर्नास्तितेके यामिमांवाचंपुष्पितांपुष्पितवृक्षवद्वेदवादरताः बहुर्यवादरताः बहुर्थवादफलसाधनप्रकाशकेषुवेदवाक्येषुरताः हेपार्थनान्यत्स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्योस्तीत्येवंवादिनोवदनशीलाः ४२ किंच तेच कामात्मानइति कामात्मानः कामस्वभावाः कामपराइत्यर्थः स्वर्गपराः स्वर्गःपरःपुरुषार्थोयेषांतेस्वर्गपराः स्वर्गप्रधानाः जन्मकर्म

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वेदवादरताःपार्थनान्यदस्तीतिवादिनः ४२
कामात्मानःस्वर्गपराजन्मकर्मफलप्रदां क्रियाविशेषबहुलांभोगैश्वर्यगतिप्रति ४३

फलप्रदां कर्मणःफलंकर्मलंजन्मैवकर्मफलंतत्प्रदातीतिजन्मकर्मफलप्रदांतांवाचंप्रवदंतीत्यनुषज्यते क्रियाविशेषबहुलां क्रियाणांविशेषाःक्रियाविशेषास्तैर्बहुलायस्यांस्वर्ग ना पुत्रपश्वाद्यर्थायवाचाबाहुल्येनप्रकाश्यंतेभोगैश्वर्यगति भोगश्चऐश्वर्यंचभोगैश्वर्यंतयो र्गतिःप्राप्तिर्भोगैश्वर्यगतिस्तांप्रतिसाधनभूतास्तेक्रियाविशेषास्तद्बहुलांतांवाचंप्रवदंतो मूढाःसंसारेपरिवर्तंतइत्यभिप्रायः ४३ श्रीमच्छंकराचार्योयनमोनमः श्री

तेषांच भोगैश्वर्यमिति भोगैश्वर्यप्रसक्तानांभोगःकर्त्तव्यःऐश्वर्यंचेतिभोगैश्वर्ययोरेवप्रणयवतांतदात्मभूतानां तयाक्रियाविशेषबहुलयावाचाअपहृतचेतसांआच्छादितविवेकप्रज्ञानां व्यवसायात्मिकासांख्ययोगेवाबुद्धिःसमाधौसमाधीयतेऽस्मिन्पुरुषोपभोग्यायसर्वमितिसमाधिरंतःकरणंबुद्धिस्तस्मिन्समाधौनविधीयतेनभवतीत्यर्थः ४४ यएवंविवेकबुद्धिरहितास्तेषांकामात्मनां त्रैविद्यगुण्यविषयेति

भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ४४श्री
त्रैगुण्यविषयावेदानिस्त्रैगुण्याभवार्जुन निर्द्वंद्वोनित्यसत्वस्थोनियोगक्षेमआत्मवान् ४५

त्रैगुण्यविषयाःत्रैगुण्योसंसारोविषयःप्रकाशहेतव्योयेषांतेवेदाःत्रैगुण्यविषयाः त्वंतुनिस्त्रैगुण्यो भवार्जुननिष्कामोभवेत्यर्थः सुखदुःखहेतूसत्रतिपक्षोपदार्थौद्वंद्वशब्दाभ्योयतोनिर्गतोनिर्द्वंद्वोभव नित्यसत्वस्थः सदासत्वगुणाश्रितोभव तथानियोगक्षेमोऽनुपात्तस्योपादानंयोगउपात्तस्यरक्षणंक्षेमोयोगक्षेमप्रधानस्यश्रेयसिप्रवृत्तिर्दुष्करेत्यतोनियोगक्षेमोभव आत्मवानप्रमत्तश्चभव ४५

एषतवोपदेशःस्वधर्ममनुतिष्ठतःसर्वेषुवेदोक्तेषुकर्मसुयान्युक्तान्यनंतानिफलानिनापेक्ष्यंतेचेत्किमर्थं
तानीश्वरायेत्यनुष्ठीयंतइत्युच्यतेशृणु यावानिति यथालोकेकूपतडागाद्यनेकस्मिन्नुदपानेपरिछि
न्नोदकेयावान्यावत्परिमाणस्नानपानादिरर्थःफलंप्रयोजनंससर्वोर्थःसर्वतःसंप्लुतोदकेयोर्थस्तावा
नेवसंपद्यतेतत्रांतर्भवतीत्यर्थः एवंतावत्स्नावत्परिमाणएवसंपद्यतेसर्वेषुवेदेषुवेदोक्तेषुकर्मसु।
योर्थोयत्कर्मफलंसोर्थोब्राह्मणस्यसन्यासिनःपरमार्थतत्वंज्ञानतोयोर्थोयद्विज्ञानफलंसर्वतःसंप्लु
तोदकस्थानीयंतस्मिन्स्नावानेवसंपद्यते यथोक्तायविजितायाधरेयाःसंयंत्यवंएनंसर्वतदभिसम

यावानर्थउदपानेसर्वतःसंप्लुतोदके तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ४६ क
र्मण्येवाधिकारस्तेमाफलेषुकदाचन माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि ४७

तियत्किंचप्राज्ञाःसाधुकुर्वंतियस्तद्देसर्वेदेतिश्रुतेः सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइतिवक्ष्य
ति तस्मात्सन्न्यासज्ञाननिष्ठाधिकारप्राप्तेःकर्मण्यधिरूढेनकूपतडागाद्यर्थस्थानीयंसर्वंमपिकर्मक
र्त्तव्यं ४६ नवच कर्माणीति कर्मण्येवाधिकारोनज्ञाननिष्ठायांतेव तत्रचकर्मकुर्वतोमाफलेषु
धिकारोःस्तुकर्मफलतृष्णामाभूत्कदाचनकस्यचिदप्यवस्थायामित्यर्थः यदाकर्मफलेतृष्णांते
स्यात्तदाकर्मफलप्राप्तेर्हेतुःस्याःएवंकर्ममाभूत्[illegible]यदाहिकर्मफलतृष्णाप्रयुक्तः

यदिपुनःफलप्रयुक्तेननकर्त्तव्यंकर्मकथंतर्हिकर्त्तव्यमित्युच्यते योगस्थेति योगस्थःसन्कुरुकर्माणिके
वलमीश्वरार्थंच तत्रापीश्वरोमेतुष्यतिमंगंत्यक्त्वाधनंजय फलतृष्णाशून्येनक्रियमाणेकर्मणिसत्व
शुद्धिज्ञानप्राप्तिलक्षणासिद्धिःतद्विपर्ययजाऽसिद्धिस्तयोःसिध्यसिध्योरपिसमस्तुल्योभूत्वाकुरु
कर्माणि कोसौयोगोयत्रस्थःकुर्वित्युक्तमिदमेवतत्रसिध्यसिध्योःसमत्वंयोगउच्यते ४८ यत्पुनः
समत्वबुद्धियुक्तमीश्वराराधनार्थकर्मैतस्मात्कर्मणः दूरेणेति दूरेणातिविप्रकर्षेणत्ववरंनिकृष्टक

योगस्थःकुरुकर्माणिसंगंत्यक्त्वाधनंजय सिध्यसिध्योःसमोभूत्वासमत्वंयोगउच्यते ४८
दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय बुद्धौशरणमन्विछकृपणाःफलहेतवः ४९

र्मफलार्थिनाक्रियमाणंबुद्धियोगात्समत्वबुद्धियुक्तात्कर्मणोजन्ममरणादिहेतुत्वाद्धनंजय य
तएवंयोगविषयायांबुद्धौतत्परिपाकजायांवासांख्यबुद्धौशरणमाश्रयमभयप्राप्तिकारणम॥
न्विछप्रार्थयस्वपरमार्थज्ञानद्वारेणोभवेत्यर्थः यतोऽवरंकर्मकुर्वाणाः कृपणाः दीनाः फलहेत
वः फलतृष्णाप्रयुक्ताःसंतोयोवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः
४९ श्रीमच्छंकराचार्योयनमोनमः श्रीलक्ष्मीनारायणायनमोनमः श्रीशंकर

समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठन्यत्यलंप्राप्नोतितन्मृणु बुद्धियुक्तइति बुद्धियुक्तःसमत्वविषयया
बुध्यायुक्तोबुद्धियुक्तोजहातिपरित्यजति इहास्मिन्लोकेउभेसुकृतदुष्कृतेपुण्यपापेसत्वशुद्धिज्ञा
नप्राप्तिद्वारेणयतस्मात्समत्वबुद्धियोगाययुज्यस्वघटस्व योगोहिकर्मसुकौशलं स्वधर्माख्येषु
कर्मसुवर्त्तमानस्ययास्मिंध्यसिध्योःसमत्वबुद्धिरीश्वरार्पितचेतस्त्वयातद्धिकौशंकुशलंभवस्तद्धिको
शंयोयद्धस्वभावान्यपिकर्मणिसमत्वबुध्यास्वभावान्निवर्त्तते तस्मात्समत्वबुद्धियुक्तोभवत्वं ५०

बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते तस्माद्योगायुज्यस्वयोगःकर्मसुकौशलं ५०
कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः जन्मबंधविनिर्मुक्ताःपदंगच्छंत्यनामयं ५१

यस्मात् कर्मजमिति कर्मजंफलंत्यक्त्वेतिव्यवहितेनसंबंधः इष्टानिष्टदेहप्राप्तिकर्मजंफलंकर्म
भोजातं बुद्धियुक्ताःसमत्वबुद्धियुक्ताहियस्मात्फलंत्यक्त्वापरित्यज्यमनीषिणोज्ञानिनोभूत्वाजन्म
बंधविनिर्मुक्ताः जन्मैवबंधःजन्मबंधस्तेनविनिर्मुक्ताःजीवंतएवजन्मबंधाद्विनिर्मुक्ताःसंतः पदं पर
मंविष्णोर्मोक्षाख्यगच्छंत्यनामयंसर्वोपद्रवरहितमित्यर्थः अथवाबुद्धियोगाद्धनंजयेत्यारभ्यपरमा
र्थदर्शनलक्षणेचसंवेत्संप्लुतोदकस्थानीयाकर्मयोगजसत्वशुद्धिर्जनितावुद्धिर्द्वितीयासाक्षात्सुकृत

योगानुष्ठानजनितासत्वशुद्धिःकदाप्राप्यतइत्यच्यते यदेति यदायस्मिन्कालेतेतवमोहकलिलंमोहात्म
कमविवेकरूपंकालुष्यंयेनात्मानात्मविवेकबोधकलुषीक्रियतेयस्मिन्विषयंप्रत्यंतःकरणंप्रवर्त्ततेतेनबुद्धिर्व्यति
तरिष्यतिव्यतिक्रमिष्यतिशुद्धभावमापत्स्यतइत्यर्थः तदातस्मिन्कालेगंतासिप्राप्स्यसिनिर्वेदंवैरा
ग्यंश्रोतव्यस्यश्रुतस्यचश्रोतव्यंश्रुतंचनिष्फलंप्रतिपद्यतइत्यभिप्रायः ५२ मोहकलिलात्यदा
रेणलब्धात्मविवेकजप्रज्ञःकदाकर्मयोगजंफलंपरमार्थयोगमवाप्स्यसीतितच्छृणु श्रुतिविप्रतिप

यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ५२
श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्चला समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ५३

न्नेति श्रुतिविप्रतिपन्नाश्रनेकसाध्यसाधनसंबंधप्रकाशनश्रुतिभिःश्रवणैर्विप्रतिपन्नानानाप्रतिप
न्नाश्रुतिविप्रतिपन्नाविक्षिप्तासतीतेतवबुद्धियेदायस्मिन्कालेस्थास्यतिस्थिरीभूताभविष्यति निश्च
लाविक्षेपचलनवर्जितासतीसमाधौसमाधीयतेस्मिन्निति समाधिरात्मातस्मिन्नात्मनीत्येतद्च
ला तत्रापिविकल्पवर्जितासतीबुद्धिरंतःकरणं तदायोगमवाप्स्यसि योगंविवेकप्रज्ञोसमाधिं
प्राप्स्यसि ५३ श्रीमच्छंकराचार्यनमः श्रीलक्ष्मीनृसिंहायनमः शंकरायनमः

प्रश्नबीजंप्रतिलभ्यार्जुनउवाच लब्धसमाधिप्रज्ञस्यलक्षणबुभुत्सया स्थितप्रज्ञस्येति स्थितप्रज्ञस्य
स्थिताप्रतिष्ठिताऽहमस्मिपरंब्रह्मेतिप्रज्ञायस्यसस्थितप्रज्ञः तस्यस्थितप्रज्ञस्यकाभाषाभाषणंवचनं क
थमसोपरैर्भाष्यते समाधिस्थस्य समाधौस्थितस्यकेनाव स्थितधीः स्थितप्रः स्वयंवाकिंप्रभाषेत किमासी
तव्रजेतकिं किमासनंव्रजनंवातस्यकिंकथमित्यर्थः ५४ स्थितप्रज्ञस्यलक्षणमनेनश्लोकेनदृष्टव्यते
योह्यादित्तएवसन्यस्यकर्माणिज्ञानयोगनिष्ठायांप्रवृत्तोयश्चकर्मयोगेनतयोः स्थितप्रज्ञस्यप्रजहाती
त्यारभ्याध्यायपर्यंतंस्थितप्रज्ञलक्षणंसाधनंचोपदिश्यते सर्वत्रैवह्यध्यात्मशास्त्रेकृतार्थलक्षणानि

अर्जुनउवाच स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेनाव स्थितधीः किंप्रभाषेतकिमासीतव्रजेत
किं ५४ भगवानु० प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदो

यानितान्येवसाधनान्युपदिश्यंते यत्नसाध्यहाधानियत्नसाध्यानिसाधनानिलक्षणानिचभवंतिना
निभगवानुवाच प्रजहातीति प्रजहातिप्रकर्षेणजहातिपरित्यजति यदायस्मिन्कालेकामानिच्छाभेदा
न्सर्वान्समस्तान्रूपार्थमनोगतान्मनसिप्रविष्टान् सर्वकामपरित्यागेतुष्टिकारणाभावाच्छरीरधारण
निमित्तद्वेषेचसत्यन्मत्तप्रमत्तस्येवप्रवृत्तिःप्राप्तेत्यतउच्यते आत्मन्येवप्रत्यगात्मस्वरूपेएवात्मनास्वे
नैववास्यलाभनिरपेक्षस्तृप्तः परमार्थदर्शनामृतरसलाभेनान्यस्मादलंप्रत्ययवान्स्थितप्रज्ञस्थिताप्र

तिष्ठिताआत्मानात्मविवेकजाप्रज्ञायस्यसस्थितप्रज्ञोविद्वांस्तदोच्यते त्यक्तपुत्रवित्तलोकेषणःसन्यासीआत्मा
रामआत्मक्रीडःस्थितप्रज्ञइत्यर्थः ५५ किंच दुःखेष्विति दुःखेष्वाध्यात्मिकादिषुनोद्विग्नेनप्रक्षुभितंदुःख
प्राप्तौमनोयस्यसोऽनुद्विग्नमनास्तथासुखेषुप्राप्तेषुविगतस्पृहःविगतास्पृहातृष्णायस्य नाग्निरिवेंधना
द्याधानेसुखान्यनुविवर्धतेसविगतस्पृहोवीतरागभयक्रोधोरागश्चभयंचक्रोधश्चवीतागतायस्मात्सवी
तरागभयक्रोधः स्थितधीः स्थितप्रज्ञोमुनिःसन्यासीतदोच्यते ५६ यइति योमुनिःसर्वत्रदेहजीविता

दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः वीतरागभयःक्रोधःस्थितधीर्मुनिरुच्यते ५६
यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ५७

द्विष्यनभिस्नेहोऽभिस्नेहवर्जितः तत्तत्प्राप्यशुभाशुभं तत्तच्छुभमशुभंवालब्धानाभिनंदतिनद्वेष्टि
शुभंप्राप्यननुष्यतिनहृष्यत्यशुभंप्राप्यनद्वेष्टीत्यर्थः तस्यैवंहर्षविषादवर्जितस्यविवेकजाप्रज्ञाप्रति
ष्ठिता ५७ किंच यदेति यदासंहरतेसम्यगुपसंहरतेचायंज्ञाननिष्ठायांप्रवृत्तोयतिःकूर्मोगानीवय
थाकूर्मोभयात्स्वान्यंगान्युपसंहरतेसर्वशःसर्वतः एवंज्ञाननिष्ठःइंद्रियाणीद्रियार्थेभ्यःसर्वविषयेभ्य
उपसंहरते तस्यप्रतिष्ठितेत्युक्तार्थवाक्यं ५८ यदासंहरतेचायंकूर्मोगानीवसर्वशः इंद्रियाणीद्रिया

तत्रविषयाननाहरतआतुरस्येंद्रियाणिकूर्मोगानीवसंहरियंतेनतुतद्विषयेरागःसकथंसंहरियतइत्यच्यते
विषयाइति यद्यपिविषयोपलक्षितानिविषयत्वाद्वाच्यानिइंद्रियाणि अथवाविषयाएवनिराहारस्य
अनाहरियमाणविषयस्यकष्टेतपसिस्थितस्यमूर्खस्यापिनिवर्त्तंतेदेहिनोदेहवतः रसवर्जंरसोरागो
विषयेषुयस्तंवर्जयित्वारसवर्जोरागप्रसिद्धः स्वरसेनप्रवृत्तोरसिकोरसज्ञइत्यादिदर्शनात् सोपि
रसोरंजनारूपःसूक्ष्मोस्ययतेःपरंपरमार्थतत्त्वंब्रह्मदृष्ट्वोपलभ्याहमेवतद्दितिवर्त्तमानस्यनिवर्त्तते

विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ५९ श्री
यततोह्यपिकौंतेयपुरुषस्यविपश्चितः इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ६०

निर्बीजंविषयज्ञानंसंपद्यतेइत्यर्थोनासतिसम्यग्दर्शनेरसस्योच्छेदस्तस्मात्सम्यग्दर्शनात्मिकायाः
प्रज्ञायाःस्थैर्यंकर्त्तव्यमित्यभिप्रायः ५९ सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यंचिकीर्षतास्रष्टाविंद्रियाणि
वन्हेरुष्णप्रियत्वात्तयानियुक्तात्तदनवस्थानेदोषमाह यततइति यततःप्रयत्नंकुर्वतःहियस्मा
दपिकौंतेयपुरुषस्यैषविपश्चितोमेधाविनोपीतिव्यवहितेनसंबंधः इंद्रियाणिप्रमाथीनिप्रमथनशी
लानिविषयाभिमुखंपुरुषंविक्षोभयंत्याकुलीकुर्वंतिआकुलीरुत्यचहरंतिप्रसभंप्रसह्यप्रकाश्य

तस्मात् तानीति तानिसर्वाणिसंयम्ययमनंवश्यीकरणंकृत्वायुक्तःसमाहितःसन्नासीतमत्परोहंवासुदेव
सर्वप्रत्यगात्मापरोयस्यसमत्परःनान्योहंतस्मादित्यासीतेत्यर्थः एवमासीनस्ययतेर्वश्येंद्रियाणि
वर्त्तंतेअभ्यासबलात्तस्यप्रज्ञाप्रतिष्ठिता ६१ अथेदानींपराभविष्यतःसर्वानर्थमूलमिदमुच्यते ध्याय
तइति ध्यायतःचिंतयतोविषयान्शब्दादीन्विषयविशेषानालोचयतःपुंसःपुरुषस्यसंगःआसक्तिःप्री
तिस्तेषुविषयेषूपजायतेसंगात्प्रीतेःसंजायतेसमुत्पद्यतेकामस्तृष्णानस्मात्कामात्कुतश्चित्प्रतिहतात्को

तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता ६१
ध्यायतोविषयान्पुंसःसंगस्तेषूपजायते संगात्संजायतेकामःकामात्क्रोधोभिजायते ६२
क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ६३

धोभिजायते ६२ क्रोधादिति क्रोधाद्भवतिसंमोहोविवेकःकार्याकार्यविषयःकुद्धोहिसंमूढःसन्गुरुमे
वाक्रोशति संमोहात्स्मृतिविभ्रमःशास्त्राचार्योपदेशाहितसंस्कारजनितायाःस्मृतेस्याद्विभ्रमोभ्रं
शःस्मृत्युत्पत्तिनिमित्तप्राप्तौअनुत्पत्तिस्ततःस्मृतिभ्रंशाद्बुद्धिनाशःकार्याकार्यविषयविवेकायोग्यतांतः
करणस्यबुद्धिनाशउच्यते बुद्धिनाशात्प्रणश्यति तावद्वैहिपुरुषोयावदंतःकरणंतदीयंकार्याकार्य
विषयविवेकयोग्यंतद्योग्यत्वेनष्टएवपुरुषोभवत्यतस्तस्यांतःकरणस्यबुद्धेर्नाशात्प्रणश्यतिपुरुषः

सर्वानर्थमूलमुक्तं विषयाभिध्यानमथेदानीं मोक्षकारणमिदमुच्यते रागेति रागद्वेषवियुक्तैः रागश्चद्वेषश्च रागद्वेषौ तत्पुरःसरौ हृदि याणां प्रवृत्तिः स्वाभाविकी तत्रयामुमुक्षुर्भवति सनाभ्यांवियुक्तैः श्रोत्रादिभिरिंद्रियैर्विषयानवर्जनीयाश्चरन्नुपलभमानः आत्मवश्यैरात्मनोवश्यानिवशीकृतानि तैरात्मवश्यैर्विधेयात्मेच्छातोविधेयआत्मातःकरणंयस्यसोयंप्रसादमधिगछतिप्रसन्नतास्वास्थ्यं ६४ प्रसादेसतिकिंस्यादित्यच्यते प्रसादेति प्रसादेसर्वदुःखानामाध्यात्मिकादीनांहानिर्विनाशोस्यजा

रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगछति ६४
प्रसादेसर्वदुःखानांहानिरस्योपजायते प्रसन्नचेतसोह्याशुबुद्धिः पर्यवतिष्ठते ६५
नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशांतिरशांतस्यकुतःसुखं ६६

यते किंच प्रसन्नचेतसःस्वस्थांतःकरणस्यहियस्मादाशुशीघ्रंबुद्धिः पर्यवतिष्ठतेआकाशमिवपरिसमंतादवतिष्ठतेआत्मस्वरूपएवनिश्चलीभवतीत्यर्थः एवंप्रसन्नचेतसोवस्थितबुद्धेः कृतकृत्यतायंस्मा द्रागद्वेषवियुक्तैरिंद्रियैः शास्त्राविरुद्धेषुवर्जनीयेषुयुक्तः समाचरेदितिवाक्यार्थः ६५ सयंप्रस न्नतारूप्यते नास्तीति नास्तिनविद्यतेनभवतीत्यर्थः बुद्धिरात्मस्वरूपविषयाअयुक्तस्यासमाहि नचास्ययुक्तस्यभावनाआत्मज्ञानाभिनिवेशः नथानास्यभावयतःआत्मज्ञानाभिनिवेशमकुर्वतःशां

तिरुपशमः अशांतस्यकुतःसुखंइंद्रियाणांहिविषयतृष्णातोनिवृत्तिस्तत्सुखंनविषयविषयातृष्णादुःखमेवहि सानतृष्णायांसत्यांसुखस्यगंधमात्रमप्युपपद्यतइत्यर्थः ६६ अथुस्यैकस्माद्बुद्धिर्नास्तीत्यच्यते इंद्रिया णामिति इंद्रियाणांहियस्माच्चरतांस्वविषयेषुप्रवर्तमानानांयन्मनोनुविधीयतेअनुप्रवर्त्ततेतदिंद्रियवि षयविकल्पनेनप्रवृत्तंमनोऽस्ययतेर्हरतिप्रज्ञांमात्मानात्मविवेकजांवायुर्नावमिवांभस्युदकेजिगमिषतां

इंद्रियाणांहिचरतांयन्मनोनुविधीयते तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि ६७ श्री
तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ६८

मार्गादुद्वृत्योन्मार्गेयथावायुःप्रवर्तयति एवमात्मविषयांप्रज्ञांहृत्वामनोविषयांकल्पनांकरोति ६७
यततोह्यपीत्यपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वातंचार्थमुपपाद्योपसंहरति तस्मादिति इंद्रियो णांप्रवृत्तौदोषउपपादितोयस्मात्तस्माद्यस्ययतेः हेमहाबाहोनिगृहीतानिसर्वशः इंद्रियाणींद्रिया र्थेभ्यः तस्यप्रज्ञाप्रतिष्ठिता ६८ श्रीमत्सद्गुरुशंकराचार्यायनमोनमः श्रीशंकर श्रीगु

तस श्रीरुद्र १९

योयंलौकिकोवैदिकव्यवहारसउत्पन्नविवेकविज्ञानस्यस्थितप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तोनिवर्त्तते अ
विद्यायाविरोधान्निवृत्तिरित्येतमर्थंस्फुटीकुर्वन्नाह यानिशेति यानिशारात्रिःसर्वपदार्थानामविवेकरीके
तमःस्वभावत्वात्सर्वेषांभूतानांसर्वभूतानांकिंतत्परमार्थतत्वंस्थितप्रज्ञस्यविषयः यथानक्तंचराणाम्
हरवसदन्येषांनिशाभवति तद्वन्नक्तंचरस्थानीयानामज्ञानांसर्वभूतानांनिशेवनिशापरमार्थतत्वमगो
चरत्वादतद्बुद्धीनांतस्यांपरमार्थतत्वलक्षणायांअज्ञाननिद्रायाःप्रबुद्धोजागर्त्तिसंयमीसंयमवान्जि
तेंद्रियोयोगीइत्यर्थः यस्यांग्राह्यग्राहकभेदलक्षणायामविद्यानिद्रायांप्रसुप्तान्येवभूतानिजाग्र

यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ६९

तीत्यर्द्धेनप्रस्तुताइवस्वप्नदृशःसानिशाअविद्यारूपत्वात्परमार्थतत्वंपश्यतोमुनेरतःकर्माण्यविद्याव
स्थायामेवचोद्यंतेनविद्यावस्थायांविद्यायांसत्यांउदितेसवितरिव्वारेरिवतमःप्रणाशमुपगच्छत्यवि
द्याप्राग्विद्योत्पत्तेरविद्याप्रमाणबुध्यागृह्यमाणक्रियाकारकफलभेदरूपासतीसर्वकर्महेतुत्वप्रतिप
द्यते नाप्रमाणबुध्यागृह्यमाणायाःकर्महेतुत्वोपपत्तेःप्रमाणभूतेनवेदेनममचोचितंकर्त्तव्यंकर्मे
तिहिकर्मणिकर्त्तात्प्रवर्त्ततेनाविद्यामात्रमिदंसर्वंनिशेवेति यस्यपुनर्निशेवाविद्यामात्रमिदंसर्वंभेद
जातमितिज्ञानंतस्यात्मज्ञस्यसर्वकर्मसन्न्यासेएवाधिकारोनप्रवृत्तौ तथाचदर्शयिष्यति तद्बुद्धयस्तद्ा

त्मानइत्यादिनाज्ञाननिष्ठायामेवाधिकारंस्तुत्वापिप्रवर्त्तकप्रमाणाभावेप्रवृत्त्यनुपपत्तिरितिचेन्नस्वात्मविषय
त्वात्तज्ञानस्यनत्वात्मनःस्वात्मनिप्रवर्त्तकप्रमाणोपन्यासाच्चात्मत्वादेवतद्गतत्वाच्चसर्वप्रमाणानाप्रमा
णत्वस्यनत्वात्मस्वरूपाधिगमेसतिपुनःप्रमाणप्रमेयव्यवहारःसंभवतिप्रमातृत्वंत्वात्मनोनिवर्त्तय
त्यंप्रमाणंनिवर्तयदेवचाप्रमाणंभवति स्वप्नकालप्रमाणमिवचप्रतिबोधेलोकेचवस्त्वधिगमेप्रवृत्ति

आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् तद्व
त्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ७०

हेतुत्वदर्शनात्प्रमाणस्य तस्मान्नात्मविदःकर्मण्यधिकारइतिसिद्धं ६९ विदुषस्त्यक्तैषणस्यस्थितप्र
ज्ञस्ययतेरेवमोक्षप्राप्तिर्नेत्वसन्न्यासिनःकामकामिनइत्येतमर्थंदृष्टांतेनप्रतिपादयिष्यन्नाह आपू
र्यमाणमिति आपूर्यमाणमद्भिरचलप्रतिष्ठंअचलतयाप्रतिष्ठायस्यतंअचलप्रतिष्ठंसमुद्रमापःसर्व
तोगताःप्रविशंतिस्वात्मस्वरूपमविक्रियमेवसंतंयद्वत्तद्वत्कामाविषयसन्निधावपिसर्वतइष्टाविशेषाःयं

समुद्रमिवापोऽविकुर्वंतः प्रविशंतिसर्वेऽत्रात्मन्येवप्रलीयंतेनस्वात्मवशंकुर्वंतिसशांतिंमोक्षमाप्नोतिनेतरःकामका
मीकाम्यतइतिकामाविषयास्तान्कामयितुंशीलंयस्यसकामकामीनप्राप्नोतीत्यर्थः ७० यस्मादेवंत
स्मात् विहायेति विहायपरित्यज्यकामान्यःसन्यासीपुमान्सर्वान्दोषांश्चरतिजीवनमात्रचेष्टान्दोषःप्र
त्यवेक्षितव्यइत्यर्थः निस्पृहःशरीरजीवनमात्रेपिनिर्गतास्पृहायस्यसनिस्पृहःसन्नित्यभिप्रायः निर्ममःशरीर
जीवनमात्रास्पदेपरिग्रहेपिममेदंइत्यभिनिवेशवर्जितोनिरहंकारोविद्यावत्त्वादिनिमित्तात्मसंभावनारहि

विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः निर्ममोनिरहंकारःसशांतिमधिगच्छति ७१ एषा
ब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति ७२ इतीश्वराध्याय

हितइत्येतत्सएवंभूतःस्थितप्रज्ञोब्रह्मविज्ञातिसर्वसंसारदुःखोपरमलक्षणांनिर्वाणाख्यामधिगच्छ
तिप्राप्नोतित्रह्मभूताभवतीत्यर्थः ७१ सैषाज्ञाननिष्ठारूप्यते एषाइति एषायथोक्ताब्राह्मीब्रह्मण
भवेयंस्थितिंसर्वकर्मसन्यासब्रह्मस्वरूपेणैवावस्थानमित्येतत्तेनैनांस्थितिंप्राप्यलब्ध्वाविमुह्यतिन्
मोहंप्राप्नोतिस्थित्वास्यांस्थितोब्राह्म्यांयथोक्तायांब्रह्मसंस्थायांयोक्तायांब्रह्मनिर्वाणंब्रह्मणिनिर्
तिंमोक्षमृच्छतिगच्छतिकिमुक्तंभवतिब्रह्मचर्यादेवसन्न्यस्यायावज्जीवंयोब्रह्मण्येवावतिष्ठतेसब्रह्मनि-

ORIENTAL RESEARCH INSTITUTE

ॐ शास्त्रस्यप्रवृत्तिनिवृत्तिविषयभूतेदेबुद्धीभगवतानिर्दिष्टेसांख्येबुद्धिर्योगेबुद्धिरितिच तत्रप्रजहातिय
दाकामानित्यारभ्याध्यायपरिसमाप्तेः सांख्यबुध्याश्रितानांसन्यासंकर्त्तव्यमुक्तातेषांतन्निष्ठानर्थक्य
प्राप्तमितिकर्मयोगेनयोगिनांस्थितिरित्यर्जुनायचकर्मण्येवाधिकारस्तेमातेसंगोस्त्वकर्मणीतिकर्मैवकर्त्तव्य
मुक्त्वान्यागबुद्धिमाश्रित्यनैष्कर्म्यएवश्रेयःप्राप्तिमुक्तवांस्तदेतदालक्ष्यपर्याकुलीभूतबुद्धिरर्जु
नउवाच कथंभक्तायश्रेयोर्थिनेयत्साक्षाच्छ्रेयःसाधनंसांख्यबुद्धिनिष्ठांश्रावयितामाकर्मणिदृष्ट
नेकानर्थयुक्तेपारंपर्येणाप्यनैकांतिकश्रेयःप्राप्तिकालनियुंक्ष्यादितियुक्तेःपर्याकुलीभावोर्जुन
स्यतदनुरूपश्चप्रश्नोज्यायसीचेत्यादिःप्रश्नापाकरणश्चवाक्यंचभगवतंयुक्तंयथोक्तविभागवि
षयेशास्त्रे केचित्त्वर्जुनस्यप्रश्नार्थमन्यथाकल्पयितातत्प्रतिकूलंभगवतःप्रतिवचनंवर्णयंतिय
थाचात्मनासंबंधग्रंथगीतार्थानिरूपितस्तत्प्रतिकूलंचेहपुनःप्रश्नप्रतिवचनयोरर्थंनिरूपयंति
कथं तत्रसंबंधग्रंथतावत्सर्वेषामाश्रमिणांज्ञानकर्मणोःसमुच्चयोगीताशास्त्रेनिश्चितोर्थइत्यु
क्तं पुनर्विशेषितंचयावज्जीवश्रुतिचोदितानिकर्माणिपरित्यज्यकेवलादेवज्ञानान्मोक्षःप्राप्यत
इत्येतदेकांतेनैवविप्रतिषिद्धमितिदृष्ट्वाश्रमविकल्पंदर्शयितायावज्जीवश्रुतिचोदितानामेवकर्म
णांपरित्यागउक्तस्तत्कथमाहशंविरुद्धमर्थमर्जुनायब्रूयात्भगवान् श्रोतावाकथंविरुद्धंअर्थमव

धारयेत् तत्रेतत्स्याद्गृहस्थानामेवश्रौतकर्मपरित्यागेनकेवलादेवज्ञानान्मोक्षः प्रतिषिध्यतेनत्वाश्रमांतरा
णामित्येतदपिपूर्वोत्तरविरुद्धंव कथं सर्वाश्रमाणांज्ञानकर्मणोःसमुच्चयोगीताशास्त्रेनिश्चितोथ
इतिप्रतिज्ञायेहकथंतद्विरुद्धंकेवलादेवज्ञानान्मोक्षंब्रूयादाश्रमाणांतराणामथमतंश्रौतकर्मा
पेक्षयेतदचनंकेवलादेवज्ञानाच्छ्रौतकर्मरहिताद्गृहस्थानांमोक्षः प्रतिषिध्यतइति तत्रगृहस्था
नांविद्यमानमपिस्मार्त्तंकर्माविद्यमानवदुपेक्ष्यज्ञानादेवकेवलादित्युच्यते इत्येतदपिविरुद्धंकथं
गृहस्थस्यैवस्मार्त्तकर्मणासमुच्चितज्ञानान्मोक्षः प्रतिषिध्यतेनत्वाश्रमांतराणामितिकथंविवे
किभिःशक्यमवधारयितुं किंच यदिमोक्षसाधनत्वेनस्मार्त्तानिकर्माण्यूर्ध्वरेतसांसमुच्चीयंते
नराग्गृहस्थस्यापीष्यतांस्मार्त्तैरवनश्रौतैःअथश्रौतैःस्मार्त्तैश्चगृहस्थस्यैवसमुच्चयोमोक्षायाद्देरत्त
सांनुस्मार्त्तकर्ममात्रसमुच्चितज्ञानान्मोक्षइतितत्रैवंसतिगृहस्थस्यासबाकुल्यश्रौतंस्मार्त्तंचब
हुदःस्वरूपंकर्मशिरसारोपितंस्यादथगृहस्थस्यैवायासबाकुल्यकारणान्मोक्षः स्यान्नाश्रमांतराणांश्रौ
तनित्यकर्मरहितत्वादिति तदप्यसत् सर्वोपनिषत्स्वतिहासपुराणयोगशास्त्रेषुचज्ञानांगत्वेनमु
मुक्षोः सर्वकर्मसन्यासविधानादाश्रमविकल्पसमुच्चयविधानाच्चश्रुतिस्मृतोःसिद्धत्वाच्चसर्वाश्रमा
णांज्ञानकर्मणोःसमुच्चयोनमुमुक्षोःसर्वकर्मसन्यासविधानात् कस्यायथोक्तावयवेचरंति त

स्मान्यासमेषांतपसामतिरिक्तमाहुर्न्यासएवात्यरेचयदिति नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमान
शुरितिच ब्रह्मचर्यादेवप्रव्रजेदित्याद्याः सत्यधर्ममधर्मंचउभेसत्यानृतेत्यज उभेसत्यानृतेत्यक्त्वायेन
त्यजसितंत्यज संसारमेवनिःसारंदृष्ट्वासारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाःपरंवैराग्यमाश्रिताइ
तिबृहस्पतिः कर्मणाबध्यतेजंतुर्विद्ययाचविमुच्यते तस्मात्कर्मनकुर्वंतियतयःपारदर्शिनइ
तिशुकानुशासनं इहापिचसर्वकर्माणिमनसासन्यस्येत्यादि मोक्षस्यचाकार्यत्वान्मुमुक्षोःक
र्मनिरर्थक्यं नित्यानिप्रत्यवायपरिहारार्थानीतिचेन्नासन्यासिविषयत्वात्प्रत्यवायप्राप्तेर्नित्यनि
कार्यत्वकरणात्सन्यासिनःप्रत्यवायःकल्पयितुंशक्योयथाब्रह्मचारिणमसन्यासिनामपिनक
र्मणांतावन्नित्यानामकरणान्नअभावादेवभावरूपस्यप्रत्यवायस्योत्पत्तिःकल्पयितुमशक्या
युक्ताचकथमसतःसज्जायेतेत्यसतःसज्जन्मासंभवश्रुतेः यदिविहिताकरणादसंभाव्यमपि
प्रत्यवायंब्रूयाद्दत्तदानर्थकरोवेदःप्रमाणमित्युक्तंस्याद्विहितस्यकरणाकरणयोर्दृःखमात्रफल
त्वात्तुयाचकारकेन्यूनत्वज्ञापकमित्यनुपपन्नार्थकल्पनंस्यान्नचेतदिष्टं तस्मात्तन्यासिनांन
कर्माणिश्रुतोसन्तु [illegible] ज्ञानकर्मणोःसमुच्चयानुपपत्तिर्ज्यायसीचेदित्यर्जुन
स्यप्रश्नानुपपत्तेश्चयदिहिभगवताद्वितीयाध्यायेज्ञानंकर्मचत्वयेकेनानुष्ठेयमित्युक्तंसा

ततोर्जुनस्यप्रश्नोनुपपन्नोज्यायसीचेत्कर्मणस्तेमतावुद्धिरितिअर्जुनायचेद्बुद्धिकर्मणीत्ययानुष्ठेयेइत्यके
याचकर्मणोज्यायसीबुद्धिःसायुक्तेवतितत्किंघोरेमांनियोजयसीतिप्रश्नोनकथंचनोपपद्यते नचार्जु
नस्यवज्ञायसीबुद्धिर्नानुष्ठेयेतिभगवतोक्तपूर्वमितिकल्पयितुंयुक्तंयेनज्यायसीचेदितिप्रश्नः
स्याद्यदिपुनरेकस्यपुरुषस्यज्ञानकर्मणोर्विरोधाद्नुष्ठानंनसंभवतीतिभिन्नपुरुषानुष्ठेयत्वंभगव
तासूचितंस्यात्ततोयंप्रश्नउपपन्नोज्यायसीचेदित्यादिरविवेकतःप्रश्नकस्यनायामपिभिन्नपुरुषा
नुष्ठेयत्वनभगवतःप्रतिवचनंनोपपद्यते नचाज्ञाननिमित्तंभगवत्प्रतिवचनकल्प्यं अस्माच्चभिन्न

अर्जुन० ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन तत्किंकर्मणिघोरेमांनियोजयसिकेशव १

पुरुषानुष्ठेयत्वेनज्ञानकर्मनिष्ठयोर्भगवतःप्रतिवचनदर्शनात्ज्ञानकर्मणोःसमुच्चयानुपपत्तिःकेवलज्ञा
नान्मोक्षइत्येषोनिश्चितोगीतासुसर्वोपनिषत्कज्ञानकर्मणोरेकंवदनिश्चित्यैतिचेत्कविषयेवप्रार्थना
नुपपन्नाउभयोःसंभवेकुरुकर्मैवतस्मात्त्वमितिचज्ञाननिष्ठाऽसंभवमर्जुनस्यावधारणेनदर्शयिष्यति
ज्यायसीचेदिति ज्यायसीश्रेयसीचेद्यदिकर्मणःसकाशात्तेनवमताभिप्रेताबुद्धिर्ज्ञानं हेजनार्दन य
द्विबुद्धिकर्मणीसमुच्चितेइष्टतदेकंश्रेयःसाधनमितिकर्मणोज्यायसीबुद्धिरितिकर्मणोतिरिक्तकर
णंबुद्धेरनुपपन्नमर्जुनेनकृतंस्यान्हितदेवतस्मात्फलतोतिरिक्तंस्यात्तथाकर्मणःश्रेयस्करीभगव

नोक्तबुद्धिरश्रेयस्करंचकर्मकुर्वितिमांप्रतिपादयतितत्किंनुकारणमितिभगवतउपालंभमिवकुर्वंस्तत्किंकर्म
णिघोरेक्रूरहिंसालक्षणेमांनियोजयसिकेशवेतिचयदाहतच्चनोपपद्येत अथस्मात्तेनैवकर्मणासमुच्च
यःसर्वेषांभगवतोक्तोऽर्जुनेनचावधारितश्चेत्तत्किंकर्मणिघोरेमांनियोजयसीत्यादिकथंयुक्तंवचनं १ किंच
व्यामिश्रेणेति व्यामिश्रेणेवयद्यपिविविक्ताभिधायीभगवांस्तथापिममंदबुद्ध्यामिवभगवद्वाक्यंप्रति श्रमि
भातितेनममबुद्धिंमोहयसीवममबुद्धिव्यामोहापनयायप्रवृत्तस्त्वंकथंमोहयस्यतोब्रवीमिबुद्धिंमोहयसी

व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयां २ श्री

पति तंतुभिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवंयदिमन्यसेतत्रैवंसतितयोरेकंबुद्धिक
र्मवाइदमर्जुनस्ययोग्यंबुद्धिरात्मस्वरूपमितिनिश्चित्यवद येनज्ञाननकर्मणावान्यतरेणश्रे
योहमाप्नुयामितियदुक्तंतदपिनोपपद्यते यदिहकर्मनिष्ठायागुणभूतमपिज्ञानंभगवतोक्तंस्यात्त
कथंतयोरेकंवदेत्येकविषयवार्जुनस्यशुश्रूषास्यात् नहिभगवतोक्तमन्यतरदेवज्ञानकर्मणोर्वक्ष्या
मिनवद्यमिति येनाभयप्राप्त्यसंभवमात्मनोमन्यमानएकमेवप्रार्थयेत् २ श्रीशंकराचार्यायनमः

प्रश्नानुरूपमेवप्रतिवचनंश्रीभगवानुवाच लोकेति लोकेस्मिंछास्त्रार्थानुष्ठानाधिकृतेत्रैवर्णिकानांद्विविधा द्विःप्रकारानिष्ठास्थितिरनुष्ठेयतात्पर्यंपुरापूर्वंसर्गादौप्रजाःसृष्ट्वातासामभ्युदयनिश्रेयसंसिसाधनंवेदार्थसंप्रदायंकुर्वताप्रोक्तामयासर्वज्ञेनेश्वरेण हेअनघअपापअपाप कासाद्विविधानिष्ठाइत्यतआह तत्रज्ञानयोगेनज्ञानमेवयोगस्तेनज्ञानयोगेनसांख्यानामात्मानात्मविषयविवेकज्ञानवतांब्रह्मचर्याश्रमादेवकृतसन्यासानांवेदांतविज्ञानसुनिश्चितार्थानांपरमहंसपरिव्राजकानांब्रह्मण्यवस्थितानांनिष्ठाप्रोक्ता कर्मयोगेनकर्मयोगस्तेनकर्मयोगेनयोगिनांकर्मिणांनिष्ठाप्रोक्तेत्यर्थः यदि

श्रीभगवानुः लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनां ३

चैकेनपुरुषेणैकस्मैपुरुषार्थायज्ञानंकर्मचसमुच्चित्यानुष्ठेयंभगवतेष्टमुक्तंवक्ष्यमाणंवागीतासुचवेदेषुचोक्तंकथमिहार्जुनायोपसन्नायप्रियायविद्विष्टभिन्नपुरुषकर्तृकेएवज्ञानकर्मनिष्ठेब्रूयाद्यदिपुनरर्जुनोज्ञानंकर्मचद्वयंश्रुत्वास्वयमेवानुष्ठास्यत्यन्येषांतुभिन्नपुरुषानुष्ठेयतांवक्ष्यामीतिमतंभगवतः कल्प्यतेतदारागद्वेषवान्प्रमाणभूतोभगवान्कल्पितःस्यात् तच्चायुक्तं तस्मान्नसमुच्चयोज्ञानकर्मणोर्यतश्चार्जुनोनोक्तंकर्मणोज्यायस्त्वेबुद्धेस्तच्चस्तुतं अनिराकरणात्तस्याश्चसन्यासिनेवानुष्ठेयत्वंभिन्नपुरुषानुष्ठेयत्ववचनात्भगवतएवमेवानुमतमितिगम्यते ३

मांचबंधकारणेकर्मण्येवनियोजयसीतिविषण्णमनसमर्जुनंकर्मनारभइत्येवंमन्वानमालक्ष्याहभगवान् नकर्मणामनारंभादिति अथवाज्ञानकर्मनिष्ठयोःपरस्परविरोधादेकेनपुरुषेणयुगपदनुष्ठातुमशक्यत्वेसतीतरेतरानपेक्षयोरेवपुरुषार्थहेतुत्वप्राप्तेकर्मनिष्ठायाज्ञाननिष्ठाप्राप्तिहेतुत्वेनपुरुषार्थहेतुत्वंनस्वातंत्र्येण ज्ञाननिष्ठानुकर्मनिष्ठापायलब्धात्मिकासतीस्वातंत्र्येणपुरुषार्थहेतुरन्यानपेक्षयेत्यतमर्थंदर्शयन्नाहभगवान् नकर्मणामिति नकर्मणामनारंभात्कर्मणांक्रियाणांयज्ञादीनांदेहजन्मनिजन्मांतरेवानुष्ठितानांउपात्तदुरितक्षयहेतुत्वेनसत्त्वशुद्धिकारणानांनैष्कर्म्यं

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोश्नुते नचसन्यसनादेवसिद्धिंसमधिगच्छति ४

ज्ञानोत्पत्तिद्वारेणज्ञाननिष्ठाहेतूनांज्ञानमुत्पत्तेपूंसांक्षयात्पापस्यकर्मणः यथास्वानलप्रक्ष्यपक्षयत्यात्मानमात्मनेत्यादेःस्मरणाच्चनारंभादनुष्ठानान्नैष्कर्म्यं निष्कर्मभावंकर्मशून्यतांज्ञाननिष्ठांनिष्क्रियात्मस्वरूपेणावस्थानमितियावत्नाश्नुतेनप्राप्नोतीत्यर्थः कर्मणामनारंभान्नैष्कर्म्यंनाश्नुतेइतिवचनात्तद्विपर्ययात्तेषामारंभान्नैष्कर्म्यमश्नुतइतिगम्यतेकस्मात्तुनःकारणात्कर्मणामनारंभान्नैष्कर्म्यंनाश्नुतइत्यच्यते कर्मारंभस्यनैष्कर्म्योपायत्वात् नत्वपायमंतरेणोपेयप्राप्तिरस्ति कर्मयोगोपायत्वंचनैष्कर्म्यलक्षणस्यज्ञानयोगस्यकृताधिरुचप्रतिपा

दृष्ट्वात्मकर्तृतावत्त्वाकर्तृतावत्प्रकृतस्यात्मलोकस्यवेद्यस्यवेदनोपायत्वेननमंतंवेदानुवचनेनब्राह्मणा
विनिदिषंतियज्ञेनेत्यादिनाकर्मयोगस्यज्ञानयोगोपायत्वंप्रतिपादितमिहापिचसक्तेन्योमूढबाह्येभ्यः
स्वमाहात्म्ययोगतः योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धयेा योज्ञानंतपश्चैवपावनानिमनीषि
णामित्यादिप्रतिपादयिष्यति ननुचाभयेसर्वभूतेभ्योदत्वानैष्कर्म्यमाचरेदित्यादोकर्त्तव्यकर्मस
न्यासादपिनैष्कर्म्यप्राप्तिर्दर्शयति लोकेचकर्मणामनारंभान्नैष्कर्म्यंपुरुषोश्नुतइत्यत्रनै
ष्कर्म्यार्थिनःकिंकर्मारंभेणेतिप्राप्तमतआह नचसन्यसनादेवेति नापिसन्यसनादेवकेवला

नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ५

र्कर्मपरित्यागमात्रादेवज्ञानरहितात्सिद्धिंनैष्कर्म्यलक्षणांज्ञानयोगनिष्ठांसमधिगच्छतिनप्राप्नो
ति ४ कस्मात्पुनःकारणात्कर्मसमात्रादेवज्ञानरहितात्सिद्धिंनैष्कर्म्यलक्षणांपुरुषोनाधिगच्छती
तिहेत्वाकांक्षायामाह नहीति नहियस्मात्क्षणमपिकालंजातुकदाचित्कश्चित्तिष्ठतिअकर्मकृ
त्सनुकस्मात्कार्यते हियुस्मादवशाएवकर्मसर्वःप्राणिप्रकृतिजैःप्रकृतिर्जाताःसत्वरजस्त
मोभिर्गुणैरज्ञइतिवाक्यशेषः यतोवक्ष्यति गुणैर्यानविचाल्यतइति सांख्यानापृथक्करणादज्ञा
नामेवहिकर्मयोगोनज्ञानिनां ज्ञानिनांतुगुणैरचाल्यमानानांस्वतश्चलनाभावात्कर्मयोगानपपत्या

यस्त्वनात्मज्ञश्चोदितंकर्मनारभतेइतितद्दर्शयति कर्मेंद्रियाणीति कर्मेंद्रियाणिहस्तादीनिसंय
म्यसंहृत्ययआस्तेतिष्ठतिमनसास्मरन्निंद्रियार्थान्विषयान्विमूढात्माविमूढांतःकरणोमिथ्याचारो
मृषाचारःपापाचारःसउच्यते ६ यस्त्विति यस्तुपुनःकर्मेण्यधिकृतोज्ञोबुद्धींद्रियाणिमनसानिय
म्यारभतेर्जुनकर्मेंद्रियैर्वाक्पाण्यादिभिःकिमारभतइत्याह कर्मयोगमसक्तःसन्सविशिष्यतेइतरस्मात्

कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन् इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यते ६
यस्त्वेंद्रियाणिमनसानियम्यारभतेर्जुन कर्मेंद्रियैःकर्मयोगमसक्तःसविशिष्यते ७ नि
यतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः शरीरयात्रापिचतेनप्रसिध्येदकर्मणः ८ यज्ञा
र्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर ९ मिथ्याचारात् ७

यतएवमतः नियतंनित्यंशास्त्रोपदिष्टंयोयस्मिन्कर्मण्यधिकृतः फलायचाशक्तेतन्नियत
कर्मत्वंकुरुत्वे हेत्यर्जुन यतःकर्मज्यायोधिकतरंफलतोह्यस्मात्तदकर्मणोऽकरणादनारंभात् क
थं शरीरयात्रापित्रारास्तुतिरपिचेतनवनप्रसिध्येन्नप्रसिद्धिंगच्छेदकर्मणोऽकरणात्तोदृष्टः कु
र्मोकर्मणार्वित्रापालोक ८ यद्यप्यन्यसेबधार्यलोकर्मनकर्त्तव्यमितितदापत्त्यासतत्कथं यज्ञार्थो
क्तिं यज्ञोवैविष्णुरितिश्रुतेस्तदर्थंयत्क्रियतेतद्यज्ञार्थंकर्मतस्मात्कर्मणोन्यत्रान्यत्रकर्मणोलोकोय

इतश्चाधिकृतेनकर्मकर्त्तव्यं सहेति सहयज्ञाःयज्ञसहिताःप्रजास्त्रयोवर्णास्ताःसृष्ट्वापायपुरापूर्वसर्गादौ
उवाचउक्तवान्प्रजापतिःप्रजानांस्रष्टाअनेनयज्ञेनप्रसविष्यध्वंप्रसवाद्वृद्धिरुत्पत्तिस्तांकुरुध्वंएषयज्ञो
वोयुष्माकंअस्तुभवतुइष्टकामधुक्इष्टास्त्वंनभिप्रेतान्कामान्फलविशेषानदोग्धीतीष्टकामधुक् १०
कथं देवानिति देवानिंद्रादीनुभावयतवर्धयतानेनयज्ञेनतेदेवावोयुष्मानेवदृष्ट्यादिनाभावयंतो
भ्यायंतु परस्परमन्योन्यंभावयंतःआयंतःश्रेयःपरंज्ञानप्राप्तिक्रमेणावाप्स्यथस्वर्गंवापरं

सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक् १०
देवानुभावयतानेनतेदेवाभावयंतुवः परस्परंभावयंतःश्रेयःपरमवाप्स्यथ ११ इष्टान्भो।
गान्हिवोदेवादास्यंतेयज्ञभाविताः तैर्दत्तानप्रदायेभ्योयोभुंक्तेस्तेनएवसः १२ यज्ञशि
ष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः भुंजतेतेत्वघंपापायेपचंत्यात्मकारणात् १३ स्त्री

श्रेयोवाप्स्यथ ११ इष्टानिति इष्टानभिप्रेतानुभोगान्हिवोयुष्मभ्यंदेवादास्यंतेवितरिष्यंतिस्त्रीपशुपुत्रा
दीन्यज्ञभाविताःयज्ञैर्विवर्धितास्तोषिताइत्यर्थः तैर्दत्तानुभोगानप्रदायास्तान्ऋणमुक्तेभ्यइत्यर्थः
एभ्यादेवेभ्योभुंक्तेस्वइंद्रियाण्यवतर्पयतिस्तेनएवतस्करएवसदेवादिस्वापहारी १२ यज्ञेति यज्ञ
नःदेवयज्ञादीनिर्वर्त्यतच्छिष्टममृताख्यमशितुंशीलंयेषांतेयज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बि
षैःसर्वैःपापैःचुल्ल्यादिपंचसूनाकृतैःप्रमादकृतहिंसादिजनितैश्चान्यैर्यत्वात्सभरंपोभुंजतेतत्वघं

जगच्चक्रप्रवृत्तिहेतुर्हिकर्मकथमित्यच्यंत अन्नाद्भवंतीति अन्नाद्भुक्तालोहितंरसःपरिणतान्प्रत्यंभवं
तिजायंतेभूतानिपर्जन्यादृष्टेरन्नस्यसंभवोन्नसंभवःयज्ञाद्भवतिपर्जन्यःअग्नौप्रास्ताहुतिःसम्यगादि
त्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति यज्ञोऽपूर्वसंचकर्मसमुद्भवःऋत्विग्य
जमानयोश्चव्यापारःकर्मततःसमुद्भवोयस्ययज्ञस्यापूर्वस्यसयज्ञःकर्मसमुद्भवः १४ कर्मेति तच्च
कर्मब्रह्मोद्भवं[illegible]ब्रह्मवेदःसद्भवोयस्यतत्कर्मब्रह्मोद्भवंविद्धिजानीहि ब्रह्मपुनर्वेदाख्यंअक्षरस

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः १४ क
र्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितं १५
एवंप्रवर्तितंचक्रंनानुवर्त्तयतीहयः अघायुरिंद्रियारामोमोघंपार्थसजीवति १६

मुद्भवंअक्षरंपरमात्मानंतत्समुद्भवोयस्यतदक्षरसमुद्भवंब्रह्मवेदोयस्मात्साक्षात्परमात्माऽक्षरा
त्पुरुषनिश्वासवत्समुद्भूतंब्रह्मतस्मात्सर्वोयंप्रकाशात्मकत्वात्सर्वगतमपिसन्नित्यंसदायज्ञेविधिप्र
धानत्वाद्यज्ञेप्रतिष्ठितं १५ एवमिति एवमित्थंईश्वरेणवेदयज्ञपूर्वकंजगच्चक्रंप्रवर्तितंनानुवर्त्त
यतीहलोकेयःकर्मण्यधिकृतःसन्नघायुःअघंपापंयस्यायुर्जीवनंसाघायुःपापजीवनइतियावत्
इंद्रियारामइंद्रियेरमणंआत्मक्रीडाविषयेषुयस्यसइंद्रियारामोमोघंवृथाहेपार्थसजीवति तस्मात्त्व

प्रागात्मज्ञाननिष्ठायोग्यतापत्तेस्तदर्थेनकर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेनकर्त्तव्यमित्येतन्नकर्मणामनारंभादित्यत्रारभ्यशरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणइत्येवमंतेनप्रतिपाद्ययज्ञार्थात्कर्मणोन्यत्रेत्यादिनामोघंपार्थसजीवतीत्येवमंतेनापिग्रंथेनप्रासंगिककर्मधिकृतस्यानात्मविदःकर्मानुष्ठानेबहुकारणमुक्तंतदकरणेचदोषसंकीर्त्तनंकृतमेवंस्थितेकिमेवंप्रवर्तितंचक्रंसर्वेणानुवर्त्तनीयमाहोस्वित्पूर्वोक्तकर्मयोगानुष्ठानापायप्राप्यानात्मविदाज्ञानयोगेनवनिष्ठामात्मविद्भिःसांख्यैरनुष्ठेयामप्राप्तेनवेत्येवमर्थमजुनस्यप्रश्नमाकांक्षन्स्वयमेववाक्यस्यार्थस्यविवेकप्रतिपत्त्यर्थंएतंवेदमानविदित्वानिवृत्तमिथ्याज्ञानाःसंतोब्राह्मणाःमिथ्याज्ञानवद्भिरवश्यकर्त्तव्येभ्यःपुत्रैषणादिभ्योव्यु

यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते १७

त्थायभिक्षाचर्येशरीरस्थितिमात्रप्रयुक्तंचरंतिननेषांत्रात्मज्ञाननिष्ठाव्यतिरेकेणान्यत्कार्यमस्तीत्येतत्कस्यर्थमिहगीतायांशास्त्रेप्रतिपिपादयिषितंत्रविकुर्वन्नाहभगवान् यस्त्विति यस्तुसांख्यआत्मज्ञाननिष्ठआत्मरतिरात्मन्येवरतिर्नविषयेषुयस्यसआत्मरतिरेवस्यात्स्वेतु आत्मतृप्तआत्मनेवतृप्तोनरसादिनासमानोमनुष्यःसन्यासीआत्मन्येवसंतुष्टःसंतोषोहिबाह्येथेलाभेसर्वस्यभवतितमनपेक्ष्यात्मन्येवचसंतुष्टःसर्वतोवीततृष्णइत्येतदुक्त्वाआत्मवित्तस्यकार्यंकारणंयर्नविद्यतेनास्तीत्यर्थः १७ श्रीमच्छंकराचार्यायनमोनमः श्रीलक्ष्मीनारायणाभ्यांनमोनमः

किंच नैवेति नैवतस्येवमात्मरतेःकृतेनकर्मणार्थःप्रयोजनमस्तितत्कृतेनप्रत्यवायाख्योऽनर्थोनाकृतेनेहलोककश्चनकश्चिदपिप्रत्यवायप्राप्तिरूपआत्महानिलक्षणोवास्ति नचास्यसर्वभूतेषुब्रह्मादिस्तंबपर्यंतेषुकश्चिदर्थव्यपाश्रयःप्रयोजननिमित्तःक्रियारभ्यव्यपाश्रयाव्यपाश्रयेण किंचिद्भूतविशेषमाश्रित्यनसाध्यःकश्चिदर्थोस्तियेनतदर्थाक्रियानुष्ठयास्यात १८ नत्वेवमेतस्मिन्सर्वतःसंप्लुतोदकस्थानीयसम्यग्दर्शनेवर्त्तसे यतएवं तस्माद्दिति तस्मादसक्तःसंगवर्जितःसन्

नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः १८
तस्मादसक्तःसततंकार्यंकर्मसमाचर असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः १९
कर्मणैवहिसंसिद्धिमास्थितोजनकादयः लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि २०

ततंवेदाकार्यंकर्त्तव्यंनित्यंकर्मसमाचरनिवर्त्तय असक्तोह्यस्मात्समाचरन्मोक्षरार्थंकर्मकुर्वन्परमाप्नोतिपुरुषःपरंमोक्षमाप्नोतिपुरुषःसत्त्वशुद्धिद्वारेणेत्यर्थः १९ यस्माच्च कर्मणैवेति कर्मणैवहिपूर्वेजनकादयोक्षत्रियाःविद्वांसःसंसिद्धिंमोक्षंगंतुमास्थिताःप्राप्ताःकेजनकादयोजनकाश्चेत्यादिप्रभृत्तयोर्यादृशेप्रश्नेसम्यग्दर्शनानुक्तौलोकसंग्रहार्थंप्रारब्धकर्मवत्त्वात्कर्मणासहवासोन्यस्यकर्मसंसिद्धिमास्थिताइत्यर्थः अथापिनसम्यग्दर्शनाज्जनकादयस्तदाकर्मणासत्त्वशुद्धि

लोकसंग्रहःकिमर्थंकर्त्तव्यइत्युच्यते यदिति यद्यत्कर्माचरतिश्रेष्ठःप्रधानःतत्तदेवकर्माचरतीतरोऽपि जनस्तदनुगतः किंच सःश्रेष्ठोयत्प्रमाणंकुरुतेलौकिकंवैदिकंवालोकस्तदनुवर्त्ततेतदेवप्रमाणं करोतीत्यर्थः २१ यद्यत्रतेलोकसंग्रहकर्त्तव्यतायांविप्रतिपत्तिर्मोकिंनपश्यसि नेति नमेमपार्थ नास्तिनविद्यतेकर्त्तव्यंत्रिषुपिलोकेषुकिंचनकिंचिदपिकस्मान्नानवाप्तमवाप्तव्यंप्रापणीयंत

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते २१ नमेपा र्थास्तिकर्त्तव्यंत्रिषुलोकेकिंचन नानवाप्तमवाप्तव्यंवर्त्तएवचकर्मणि २२ यदिह्यहंनव र्त्तेयंजातुकर्मण्यतंद्रितः ममवर्त्मानुवर्त्तंतेमनुष्याःपार्थसर्वशः २३ उत्सीदेयुरिमे लोकानकुर्यांकर्मचेदहं संकरस्यचकर्त्तास्यामुपहन्यामिमाःप्रजाः २४

षापिवर्त्तेतुएवकर्मण्यहं २२ यदीति यदिपुनरहंनवर्त्तेयंजातुकदाचित्कर्मण्यतंद्रितोऽनलसः सन्ममश्रेष्ठस्यसतोवर्त्ममार्गमनुवर्त्ततेमनुष्याःहेपार्थसर्वशःसर्वप्रकारैः २३ तथाचकोदोष इत्याह उत्सीदेयुरिति उत्सीदेयुर्विनश्येयुरमेलोकाःसर्वेलोकस्थितिनिमित्तस्यकर्मणोऽभावा नकुर्यांकर्मचेदहं किंच संकरस्यचकर्त्तास्यांतेनकारणेनोपहन्यामिमाःप्रजाःप्रजानामनुग्रहायत्र वृत्तउपहतिंकुर्यामितिपरमेश्वरस्याननुरूपमापद्येत ॥

यदिपुनरहमिवत्वंकृतार्थबुद्धिरात्मविदन्योवानस्याप्यात्मनःकर्त्तव्याभावेपिपरानुग्रहएवकर्त्तव्यइति सक्ता इति सक्ताःकर्मण्यस्यफलंममभविष्यतीतिकेऽविद्वांसोयथाकुर्वंतिभारत कुर्याद्विद्वांस्तथा त्मवित्तथाऽसक्तःसन्तदुक्तंकिमर्थंकरोतीतितत्राह चिकीर्षुःकर्तुमिच्छुःलोकसंग्रहं एवलोक संग्रहंचिकीर्षोर्ममआत्मविदःकर्त्तव्यमस्त्यन्यस्यवालोकसंग्रहमुक्त्वा २५ तस्यात्मविदइदं

सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५ न बुद्धिभेदंजनयेदज्ञानाकर्मसंगिनां जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन् २६ प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमूढात्माकर्त्ताहमितिमन्यते २७

भेद मुपदिश्यते नबुद्धिमिति बुद्धिभेदोबुद्धिभेदःमयाइदंकर्त्तव्यंभोक्तव्यंचास्यकर्मणःफलमितिनिश्चि तरूपायाबुद्धेर्भेदनंचालनंबुद्धिभेदस्तंनजनयेत्नोत्पादयेत् अज्ञानामविवेकिनांकर्मसंगिनां कर्मण्यासक्तानां किंतुजोषयेत्सर्वकर्माणिविद्वान्स्वयंतदेवाविदुषांकर्मयुक्तोऽभियुक्तःसमा चरन् २६ अविद्वान्नज्ञःकथंकर्मसुसज्जतेऽत्याह प्रकृतेःप्रकृतिःप्रधानंसत्वरजस्तमसांसा म्यवस्थानस्याःप्रकृतेर्गुणैर्विकारैःकार्यकारणरूपैःक्रियमाणानिकर्माणिलौकिकानिशास्त्रीया

मः पुनः विद्वान् तत्ववित्तुमहाबाहोकस्यतत्ववित्गुणकर्मविभागयोर्गुणविभागस्यकर्मविभागस्यत अ·३
त्ववित्तित्यर्थः गुणाःकरणात्मकागुणेषुविषयात्मकेषुवर्त्ततेनात्मेतिमत्वानसज्जतेसक्तिंनकरोति
२९ येपुनःप्रकृतेर्गुणैःसम्यक्मूढाःसज्जंतेगुणानांकर्मसुगुणकर्मसुवयंकुर्मःफलायेतिता
नकृत्स्नविदःकर्मफलमात्रदर्शिनोमंदान्मंदप्रज्ञान्कृत्स्नविन्नविचालयेत्तत्तबुद्धिभेदकारणमेवचालनंतन्नकुर्यात्इत्यर्थः २९ कथंपुनःकर्मण्यधिकृतेनाद्यनमुमुक्षु

तत्ववित्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्त्ततइतिमत्वानसज्जते २९ प्रकृते
र्गुणसंमूढाःसज्जंतेगुणकर्मसु तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत् २९ मयिस
र्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा निराशीर्निर्ममोभूत्वायुध्यस्वविगतज्वरः ३०

णा कर्मकर्त्तव्यमित्युच्यते मयिवासुदेवेपरमेश्वरेसर्वज्ञेसर्वात्मनिसर्वाणिकर्माणिसंन्यस्यनिक्षिप्य श्रीशंकर
अध्यात्मचेतसाविवेकबुध्याहंकर्त्तेश्वरायभृत्यवत्करोमीत्यनयाबुध्याकिंचनिराशीस्त्यक्ताशी २९
र्निर्ममोममभावश्चनिर्गतोयस्मानवसत्वंनिर्ममोभूत्वायुध्यस्वविगतज्वरोविगतसंतापोविगत
शोकःसन्नित्यर्थः ३० यदेतन्मममतंकर्मकर्त्तव्यमितिसत्रमाणमुक्तंतत्तथा ७

येमेमतमिदंनित्यंअनुतिष्ठंतिमानवाःमनुष्याःश्रद्धावंतोनराःश्रद्दधानाअनुसूयंतोऽसूयांचमयिगु
रौवाश्रकुर्वंतोमुच्यंतेतेप्येवंभूताःकर्माभिधर्माधर्मोख्यैः ३१ येतुत्विपरीताएतन्ममममतेअभ्यसूय
तोनिश्चितानानुतिष्ठंतिनानुवर्त्ततेसर्वेषुज्ञानेषुविविधंमूढास्तेसर्वज्ञानविमूढांस्तान्विद्धिनष्टान्नो
शंगतान्व्यचेतसोऽविवेकिनः ३२ कस्मात्पुनःकारणात्त्वदीयंमतंनानुतिष्ठंते परधर्मंनानुति
ष्ठंति स्वधर्मंचनानुवर्त्ततेतत्प्रतिकूलाःकथंनविद्यन्तित्वत्प्रत्यक्षानुशासनातिक्रमदोषात् सदृशंमनुरूपं

येमेमतमिदंनित्यंअनुतिष्ठंतिमानवाः श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः ३१ ये
त्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतं सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ३२ सदृशं
चेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति ३३

चेष्टतेस्वस्याःस्वकीयायाःप्रकृतेःप्रकृतिर्नामपूर्वकृतधर्माधर्मादिसंस्कारोवर्त्तमानजन्मादावभि
व्यक्तःसाप्रकृतिःसदृशमेवसर्वोजंतुर्ज्ञानवानपिकिंमुमुक्षुरस्तस्मात्प्रकृतिंयांतिभूतानिनिग्रहः
किंकरिष्यति ममचान्यस्यवा ३३ यदिसर्वआत्मनःप्रकृतिसदृशमेवचेष्टतेनचेप्रकृतिशून्यः
कश्चिदस्तितत्तःपुरुषकारस्यविषयानुपपत्तेः शास्त्रानर्थक्यप्राप्तिरितिमुच्यते ७

इंद्रियस्येंद्रियस्यार्थेसर्वेंद्रियाणामर्थेशब्दादिविषयेइष्टेरागःअनिष्टेद्वेषःइत्येवंप्रतिइंद्रियार्थेरागद्वेषाववश्यंभावि
तोतत्रायंपुरुषकारस्यशास्त्रार्थस्यचविषयउच्यते शास्त्रार्थेप्रवृत्तःपूर्वंशक्नोगच्छत् याहिपुरुषस्यप्रकृतिःसा
रागद्वेषपुरःसरैवपुरुषंस्वकार्येप्रवर्त्तयति तदास्वधर्मपरित्यागः परधर्मानुष्ठानंचभवति यदापुनरागद्वे
षौतत्पक्षेणनियमयति तदाशास्त्रदृष्टिरेवपुरुषोभवति नप्रकृतिवशास्तस्मात्तयोरागद्वेषयोर्वशंना
गच्छेयतस्तौह्यस्यपुरुषस्यपरिपंथिनौश्रेयोमार्गस्यविघ्नकर्त्तारौतस्करावि वपथिः ३४ तत्ररागद्वेषप्रयु

इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यवस्थितौ तयोर्नवशंमागच्छेत्तौह्यस्यपरिपंथिनौ ३४ श्रे
यान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ३५

क्तोमन्यतेशास्त्रार्थमप्यन्यथापरधर्मोपिधर्मत्वादनुष्ठेयएवेति तदसत् श्रेयान्प्रशस्यतरःस्वोधर्मः
स्वधर्मोविगुणोपिगतगुणोप्यनुष्ठीयमानःपरधर्मात्स्वनुष्ठितात्साङ्गुण्येनसंपादितादपिस्वधर्मस्थित
स्यनिधनंमरणमपिश्रेयःपरधर्मस्थितस्यजीवितात्कस्मात्परधर्मोभयावहोनरकादिलक्षणंभय
मावहति ३५ यद्यप्यनर्थमूलंध्यायतोविषयानूरागद्वेषौत्यस्यपरिपंथिनावितिचोक्तं विस्तितन
मपूर्वधारितंचतदुक्तंनतूसंक्षिप्तंनिश्चितंवदमेवेतिज्ञातुमिच्छन्नर्जुनउवाच ॐ ॐ

रिणं ३७ कथंवैरीतिदृष्टांतैःप्रसाधयति धूमेनसह्येनाव्रियतेवन्हिःप्रकाशात्मकोऽप्रकाशात्मकेनयथा चादर्शोमलेनच यथोल्बेनगर्भोवेष्टनेनजरायुणाआवृतः आछादितोगर्भस्तथातेनेदमावृतं किंपुनस्तदित्युच्यतेआह्वाक्यंयत्कामेनावृतमित्युच्यते ३८ आवृतमेतेनज्ञानंज्ञानिनोनित्यवैरिणाज्ञानोहिजानातिअनेनाहमनेनप्रयुक्तंपूर्वमेवइतिदुःखीचभवतिनित्यमेवातोऽसौज्ञानिनोनित्यवैरीनतुमूर्खस्यसहिकामंतृष्णाकालेमित्रमिवपश्चात्तत्कार्येदुःखेप्राप्तेयानातितृष्णायाहदुःखीत्वमापादितइतिनपूर्वमेवातोज्ञानिनाएवनित्यवैरीकिंरूपेणकामरूपेणकाममिछेवरूपमस्येतिकामरूपः तेनदुःपूरेणा

आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा कामरूपेणकौंतेयदुःपूरेणानलेनच ३९
इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं ४०

दुःखेनपूरणमस्येतिदुःपूरोऽतस्तेनानलेननास्यालंपर्याप्तिर्विद्यतेइत्यनलस्तेनाछादितएवंतद्सौकिमधिष्ठानंकामोज्ञानस्यावरणत्वेनवैरीसर्वस्येत्यपेक्षायामाह ३९ ज्ञातेहित्रोरधिष्ठानेसुखेनत्रानुनिर्वहणकर्तृत्वास्यैवतइत्याह इंद्रियाणिमनोबुद्धिश्चास्यकामस्याधिष्ठानमाश्रयउच्यतेएतैरिंद्रियादिभिराश्रयैर्विमोहयतिविविधंमोहयति एषकामोज्ञानमावृत्याछाद्यदेहिनं यस्मा ~~यस्मात्त्वमिंद्रियाण्यादौनियम्य~~ ४० श्रीमच्छंकराचार्यपरिव्राजकाचार्यायनमोनमः

यतएवं तस्मात्वमिंद्रियाण्यादौपूर्वंनियम्यवशीकृत्यभरतर्षभपाप्मानंकामंप्रजहिपरित्यजएनंप्रकृतंवैरिणंज्ञानविज्ञाननाशिनंज्ञानंशास्त्रंतत्तथाआचार्यात्तत्त्वमात्मादीनामवबोधोविज्ञानंविशेषतदनुभवस्तयोर्ज्ञानविज्ञानयोःक्षयःप्राप्तिर्हत्वोनाशनंप्रजहिआत्मनःपरित्यजेत्यर्थः ४१ इंद्रियाण्यादौनित्यमकामंशास्त्रंतुजहिइत्युक्तं तत्र किमाश्रयःकामजहीत्यादिरुच्यते इंद्रियाणिश्रोत्रादीनिपंचदेहस्थूलत्वात्परिछिन्नंचापि ~~[illegible]~~ स्यसौक्ष्म्यात्स्थित्वव्यापित्वापेक्ष्यपराणिप्रकृष्टान्याहुःपंडितास्तेथेंद्रियेभ्यःपरंमनःसंकल्पात्म

तस्मात्वमिंद्रियाण्यादौनियम्यभरतर्षभ पाप्मानंप्रजहीत्येनंज्ञानविज्ञाननाशनं ४१ इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ४२ एवंबुद्धेःपरंबुध्वासंस्तभ्यात्मानमात्मना जहिशत्रुंमहाबाहोकामरूपंदुरासदं ४३

कंतथामनसस्तुपराबुद्धिनिश्चयात्मिका तथायःसर्वदृश्येभ्योबुध्यंतेभ्योऽभ्यंतरायंदेहिनंइंद्रियादिभिराश्रयैर्युक्तःकामोज्ञानावरणद्वारेणमोहयतीत्युक्तंसबुद्धेर्बुद्धेःपरआत्मा ४२ एवंबुद्धेःपरमात्मानंबुध्वाज्ञात्वासंस्तभ्यसम्यक्कृत्वामनःकृत्वाआत्मानंस्वेनैवात्मनासम्यक्[illegible]कृत्वासमाधायेत्यर्थः जहिनंशत्रुंमहाबाहोकामरूपंदुरासदंदुःखेनासदःआसादनंप्राप्तिर्यस्यतंदुरासदं दुर्विज्ञेयानेकविशेषमिति ४३ श्रीपरमहंसपरिव्राजकाचार्यस्यश्रीशंकरभगवतःकृतौगीताभाष्येतृतीयोऽध्यायःसमाप्तः ३

योयंयोगोध्यायद्वयेनोक्तोज्ञाननिष्ठालक्षणः ससन्
णोनिवृत्तिलक्षणश्चगीताशास्त्रसर्वैःस्वयमेवयोग
कथनेनस्तौतिभगवान् इममिति इममध्याय
त्परिपालयित्वाक्षत्रियाणांबलाधानाय तेन
क्षत्रेपरिपालितेजगत्परिपालयितुंअलमव्यः
श्रीभगवानुवाच इमंविवस्वतेयोगंप्रोक्तवानहमव
राप्राप्तमिमंराजर्षयोविदुः सकालेनेहग
गःप्रोक्तःपुरातनः भक्तोसिमेसखाचेति
नवेप्राहमनुरिक्ष्वाकवेस्वपुत्रायादिराजायाब्र
राजानश्चर्षयश्चराजर्षयोविदुरिमंयोगं
वृत्तःहेपरंतप आत्मनोविपक्षभूताःपरउच्यं
शत्रुतापनइत्यर्थः २ दुर्बलानजितेंद्रियाप्रा
मिति सएवायंमयातेतुभ्यंअद्ययोगःप्रोक्तः

स्यकर्मयोगोपायोयस्मिन्वेदार्थःपरिसमाप्तःप्रवृत्तिलक्ष
विवक्षितोभगवतःअतःपरिसमाप्तवेदार्थमन्वानस्तंवंश
येनोक्तंयोगंविवस्वतेआदित्यायसर्गादौप्रोक्तज्ञानं जग
हेयोगबलेनयुक्ताःसमर्थाःभवंतित्रत्नपरिरक्षितुंब्रह्म
अव्ययफलत्वान्नत्यस्यसम्यग्दर्शननिष्ठालक्षणस्यमो
यं विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत् १ एवं
हतायोगोनष्टःपरंतप २ सएवायंमयातेद्ययो
हस्येतदुत्तमं ३ क्षात्र्यंफलंव्येति सचविवस्वान्म
ात् १ एवमिति एवंक्षत्रियपरंपरयाप्राप्तंइमंराजर्षयो ज
योगःकालेनेहमहतादीर्घेणनष्टेविच्छिन्नसंप्रदायःसं
तानूर्जोर्यतेजोगमक्तिभिर्भान्तुरिवतापयतीतिपरंतपः
नष्टंयोगमुपलभ्यलोकंचापुरुषार्थसंबंधिनं सएवाय

भगवताविप्रतिषिद्धमुक्तमितिमाभूत्कस्यचिद्बुद्धिरि
र्वोग्वसुदेवगृहेभगवतोजन्मपरंपूर्वसर्गादौजन
र्थंतयायुस्वमेवादौप्रोक्तवानिमंयोगंसएवत्वा
कामूर्खाणांतापरिहरन्श्रीभगवानुवाच ४ य

अर्जुनउवाच अपरंभवतोजन्मपरंजन्मवि
श्रीभगवानुवाच बहूनिमेव्यतीतानिजन्मानि
अजोपिसन्नव्ययात्माभूतानामीश्वरोपिस

क्तानिजन्मानितवचहेअर्जुनतान्यहंवेदजा
त्वादहंपुनर्नित्यशुद्धबुद्धमुक्तस्वभावत्वान्नावरा
स्यधर्मोधर्मोभावेजन्मलक्ष्यते अजोपीति अजो
पिसंस्तथाभूतानांब्रह्मादिस्तंबपर्यंतानांईश्वरईश्वा

परिहारार्थंचोद्यमिवकुर्वन्नर्जुनउवाच अपरमिति अपरम
त्तिर्विवस्वतआदित्यस्यतत्कथमेतद्विजानीयांअविरुद्धा
दानीमुक्तंप्रोक्तवानसीतियावास्तदेवंनीश्वरासर्वज्ञाश्
र्थीत्यर्जुनस्यप्रश्नः बहूनीति बहूनिमेव्यतीतानिअति

स्वतः कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ४
वाचार्जुन तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ५
प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया ६

सर्वाणिनत्वंवेत्यज्ञानीषेधर्माधर्मादिप्रतिबद्धज्ञानशक्ति
ज्ञानशक्तिरितिवेदाहंपरंतप ५ कथंतर्हितवनित्येश्वर
जन्मरहितोपिसंस्तथाव्ययात्माअक्षीणज्ञानशक्तिस्वभावो
शीलोपिसन्प्रकृतिंमायांवैष्णवींत्रिगुणात्मिकांस्वावश्यसर्व

तच्चजन्मकरात्किमर्थंचेत्कथ्यते यदेति यदायदाहिधर्मस्यग्लानिर्हानिर्विकृतिर्वर्णाश्रमादिविशेषलक्षणस्यप्राणिना
मभ्युदयनिःश्रेयससाधनस्यभवतिभारतअभ्युत्थानमुन्नतिर्वोऽधर्मस्यतदात्मानंसृजाम्यहंमायया
७ किमर्थं परित्राणायेति परित्राणायपरिरक्षणायसाधूनांसन्मार्गस्थानांविनाशायचदुष्कृतांपापकारि
णां किंच धर्मसंस्थापनार्थायधर्मस्यसम्यक्कृत्स्नापनंधर्मसंस्थापनंतदर्थंसंभवामियुगेयुगे ८ जन्मे

यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं ७
परित्राणायसाधूनांविनाशायचदुष्कृतां धर्मसंस्थापनार्थायसंभवामियुगेयुगे ८
जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्वतः त्यक्त्वादेहंपुनर्जन्मनेतिमामेतिसोऽर्जुन ९
वीतरागभयक्रोधामन्मयामामुपाश्रिताः बहवोज्ञानतपसापूतामद्भावमागताः १०

ति जन्ममायारूपं कर्मचसाधूनांपरित्राणादिमेममदिव्यंमप्राकृतमैश्वरमेवंयथोक्तंयोवेत्तितत्त्वतस्तत्त्वे
नयथावत् त्यक्त्वादेहंपुनर्जन्मपुनरुत्पत्तिंनेतिनप्राप्नोतिमामेत्यागच्छतिसमुच्यतेअर्जुन ९ नेषमो
क्षमार्गइदानींप्रवृत्तः किंतर्हिपूर्वमपि वीतरागभयक्रोधाः रागश्चभयंचक्रोधश्चविगतायेभ्यस्तेवीतरागभ
यक्रोधाः मन्मयाब्रह्मविदईश्वराभेददर्शिनोमामेवचपरमेश्वरमुपाश्रिताःकेवलज्ञाननिष्ठाइत्यर्थः बहव

इतरतपोनिरपेक्षाज्ञाननिष्ठाइत्यस्यलिंगंज्ञानतपसेतिविशेषणंतबतहिरागदेषोस्तोयेनकेभ्यश्चिदेवात्मभावंप्र
यद्धसिनसर्वेभ्यइत्यत्रचये येयथाइति येयथायेनप्रकारेणयेनप्रयोजनेनयत्फलार्थितयामांप्रपद्यंतेतांस्त
थैवतत्फलदानेनभजाम्यनुगृह्णाम्यहंतेषांमोक्षप्रत्यनर्थित्वान्नत्वेकस्यमुमुक्षुत्वंफलार्थित्वंचयुगप
त्संभवत्यतोयेफलार्थिनस्तान्फलप्रदानेनयेयथोक्तकारिणस्तुफलार्थिनोमुमुक्षवश्चयतान्ज्ञानप्रदा
नेनयेज्ञानिनःसन्न्यासिनोमुमुक्षवश्चयतान्मोक्षप्रदानेन तथार्त्तानार्त्तिहरणेनेत्येवंयथाप्रपद्यंतेयेतां
स्तथैवभजामीत्यर्थः नपुनःरागद्वेषनिमित्तंमोहनिमित्तंवाकंचिद्व्यभिचारंसर्वथापिसर्वावस्थास्य

येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं ममवर्त्मानुवर्त्ततेमनुष्याःपार्थसर्वशः ११
कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा १२

ममेश्वरस्यवर्त्ममार्गमनुवर्त्ततेमनुष्याःयत्फलार्थितयायस्मिन्कर्मण्यधिकृतायेप्रयतंतेमनुष्याःतं
तेपार्थसर्वशःसर्वप्रकारैः ११ यद्वितवेश्वरस्यरागादिदोषाभावात्सर्वप्राणिष्वनुजिघृक्षायांतुल्यायांस
र्वफलदानसमर्थेचलयिसतिवाकथंदेवःसर्वमितिज्ञानेनैवमुमुक्षवःसंतःकस्मात्त्वामेवसर्वेनप्रति
पद्यंतेइति शृणुतत्रकारणं कांक्षंतःकर्मणांसिद्धिंफलनिष्पत्तिंप्रार्थयंतायजंतेइहास्मिन्लोकेदेवता
इंद्राग्न्याद्याश्रयोन्यादेवतोपास्तेन्योसावन्यारूपस्मिंइनिनसर्वदृश्यथापशुरेवंसदेवानामितिश्रुतेः
तेषांहिभिन्नदेवतायाजिनांफलंक्षीयतेक्षिप्रंक्षिप्रंहियस्मान्मानुषेलोकेमनुष्यलोकेन्यास्त्राधिकारःक्षिप्रं

मानुषेएवलोकेवर्णाश्रमादिकर्माधिकारोनान्येषुलोकेषितिनियमःकिंनिमित्तइति अथवावर्णाश्रमादि
प्रविभागोपेतामनुष्याःसमवर्त्मानुवर्त्ततेसर्वइत्युक्तंकस्मात्पुनःकारणात्तेनियमेनतत्रैववर्त्मानुवर्त्त
तेनान्यत्रेत्युच्यते चातुर्वर्ण्यंच चत्वारएववर्णाश्चातुर्वर्ण्यंमयेश्वरेणसृष्टमुत्पादितं गुणकर्मविभाग
शःगुणविभागशःकर्मविभागश्च गुणाःसत्वरजस्तमांसि तत्रसात्विकस्यसत्वप्रधानस्यब्राह्मणस्यशमो

चातुर्वर्ण्यमयासृष्टंगुणकर्मविभागशः तस्य
कर्त्तारमपिमांविद्ध्यकर्त्तारमव्ययं १३ श्री

दमस्तपइत्यादीनिकर्माणिसत्वोपसर्जनरजःप्रधानस्यक्षत्रियस्यशौर्यतेजःप्रभृतीनिकर्माणितमउपस
र्जनस्यरजःप्रधानस्यवैश्यस्यकृष्यादीनिकर्माणिरजउपसर्जनस्यतमःप्रधानस्यशूद्रस्यशुश्रूषात्मकं
स्यैवंगुणकर्मविभागशश्चातुर्वर्ण्यंमयासृष्टमित्यर्थः तच्चैदंचातुर्वर्ण्यंनान्येषुलोकेषुअतोमानुषेलोकेइ
तिविशेषणंहंततर्हिचातुर्वर्ण्यस्यसर्गादेःकर्मणःकर्तृत्वात्तत्फलेनयुज्यसेऽतोनत्वंनित्यमुक्तोनित्येश्वरइत्क

मि० यद्यपिमायायांसंबुद्धावपिनतस्यकर्तृत्वंतथापिमायोपाधिकंतत्कर्तृत्वंमय्यारोप्यमाणंमां
कर्तारमपिविद्ध्यकर्तारमव्ययं १३ श्री

येषांतुकर्मणाकर्त्तारंमामन्यसेपरमार्थतस्तेषामकर्त्तैवाहंयतो नमांतानिकर्माणिलिंपंतिदेहारंभकत्वेनाहंकारा
भावात् नचतेषांकर्मणांफलेष्वस्पृहात्तृष्णायेषांतुसंसारिणमहंकर्त्तेत्यभिमानःकर्मस्वस्पृहतत्फलेषुचता
नूकर्माणिलिंपंतीतियुक्तं तदभावान्नमांकर्माणिलिंपंतीत्येवंयोन्योपिमामात्मत्वेनाभिजानातिनाहंकर्त्ता
नमेकर्मफलेस्पृहतिसकर्मभिर्नबध्यते तस्यापिनदेहादेरारंभकानिकर्माणिभवंतीत्यर्थः १४ नाहंकर्त्ता
नमेकर्मफलेस्पृहतिएवमितिएवंज्ञात्वाकृतंकर्मसर्वैरप्यतिक्रांतैर्मुमुक्षुभिःकुरुतेनकर्मैवत्वंनतृष्णा

नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहा इतिमांयोभिजानातिकर्मभिर्नसबध्यते १४
एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतं १५
किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात् १६

सासनंनापिसन्यासःकर्त्तव्यः तस्मात्त्वंपूर्वैरप्यनुष्ठितत्वात् यद्यतत्त्ववित्त्वंतथात्मशुद्ध्यर्थं तत्त्वविच्चलो
कसंग्रहार्थंपूर्वैर्जनकादिभिःपूर्वतरंकृतंनाधुनातनंनिर्वर्तितं १५ तत्रकर्मचेत्कर्त्तव्यत्वदचनाद्वक
रोम्यहं किंविशेषितनपूर्वैःपूर्वतरंकृतमित्युच्यतेयस्मान्मद्वैषम्यंकर्मणिकृत्यं किंकर्मकिंवाकर्मेति
कवयोमेधाविनोप्यत्रास्मिन्कर्मणिदिविषयेमोहिताःमोहंगताः अतस्तेहंकर्मअकर्मचप्रवक्ष्यामि न
तज्ज्ञात्वाकर्मादिमोक्ष्यसेऽशुभात् १६ श्रीमच्छंकराचार्यायनमोनमः

नचैतत्त्वयामंतव्यंकर्मनामदेहादिचेष्टालोकप्रसिद्धमकर्मनामतदक्रियातूष्णीमासनंकिंत्तत्रबोद्धव्यमिति
कस्मात् कर्मणःशास्त्रविहितस्ययस्मादप्यस्तिबोद्धव्यंबोद्धव्यंचास्त्येवविकर्मणः प्रतिषिद्धस्यतथाऽकर्म
णश्चतूष्णींभावस्यबोद्धव्यमस्तीतित्रिष्वपिअध्याहारःकर्त्तव्यः यस्माद्गहनाविषमादुर्गमाकर्मणइत्यप
लक्षणार्थंकर्मादीनांकर्माकर्मविकर्मणांगतिःयाथात्म्यतत्वमित्यर्थः १७ किंपुनस्तत्वंकर्मादेर्यत्तूबो
द्धव्यंवक्ष्यामीतिप्रतिज्ञातंतदुच्यते कर्मणिकर्मक्रियतेऽनेनव्यापारमात्रंतस्मिन्कर्मणिअकर्मभावंयः
पश्येत् अकर्मणिचकर्मभावेपिचकर्त्तृतंत्रत्वात्प्रवृत्तिनिवृत्तिसोवैस्वत्राप्येवहिसर्वएवक्रियाकार

कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः १७
कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् १८

कादित्यवहारोविधाभूमावेवकर्मयःपश्येत्तूपश्यतिसबुद्धिमान्मनुष्येषुसयुक्तोयोगीचकृत्स्नकर्मकृत्
समस्तकर्मकृच्चसइतिस्तूयतेकर्माकर्मिणोरितरेतरदर्शीनंतुकिमिदंविरुद्धमित्यच्यते कर्मण्यकर्मयः
पश्येदकर्मणिचकर्मेति नहिकर्माकर्मस्यादकर्मवाकर्मतत्रकथंविरुद्धंपश्येत्तूदृष्टा नन्वकर्मैवपरमार्थ
तःसत्कर्मैवत्वश्वभासते मूढदृष्टेर्लोकस्यतथाकर्मैवाकर्मवत् तत्रयथाभूतदर्शीनार्थमाहभगवान् क
र्मण्यकर्मयःपश्येदित्याद्यतोनविरुद्धंबुद्धिमत्त्वोपपत्तेश्चबोद्धव्यमितिचयथाभूतमुच्यते नचविपरीत

ज्ञानादशुभान्मोक्षणंस्यात् यत्ज्ञात्वामोक्षसेऽशुभादितिचोक्तं तस्मात्कर्माकर्मणीविपर्ययेणगृहीतेप्राणि
स्तद्विपर्ययगृहणनिवृत्त्यर्थंभगवतोवचनंकर्मण्यकर्मयइत्यादि नचात्रकर्माधिकरणकर्मास्तिकुंडेब
राणीवनाप्यकर्माधिकरणंकर्मअभावत्वादकर्मणोऽतोविपरीतगृहीतेएवकर्माकर्मणीलौकिकैर्यथा
मृगतृष्णिकायामुदकंशुक्तिकायांवारजतं ननुकर्मकर्मैवसर्वेषांनकचिद्व्यभिचरति तन्न नौस्थ
स्यनाविगछंत्यांतटस्थेषुगतिभूनगेषुप्रतिकूलगतिदर्शनात् दूरेचचक्षुषासंनिकृष्टेषुगछत्सुगत्य
भावदर्शनात् एवमिहाप्यकर्मणिअहंकरोमीतिकर्मदर्शनंकर्मणिचाकर्मेतिविपरीतदर्शनंयेनतन्नि
राकरणार्थमुच्यतेकर्मण्यकर्मयइत्यादितदेतदुक्तंप्रतिवचनमप्यसदुत्पन्नविपरीतदर्शनभावित
त्वायोमुह्यमानोलोकः श्रुतमप्यसदुक्तत्वंविस्मृत्यविस्मृत्यमिथ्याप्रसंभवनार्थावतार्थचोद्यतो ग
तिपुनःपुनरुक्तरमाहभगवानुद्विज्ञेयत्वंचालक्ष्यवक्तृनःअयंक्रोयमचिंत्योयंनजायतेम्रियतेसादि
नाऽत्मनिकर्मीभावःश्रुतिस्मृतिन्यायप्रसिद्धउक्तोवक्ष्यमाणश्चतस्मिन्नात्मनिकर्मीभावअकर्मणि
कर्मविपरीतदर्शनमत्यंतरूढंयतःकिंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः देहाद्याश्रयंकर्मात्म
न्यधारोप्यहं कर्ताममेतत्कर्ममयाऽस्यकर्मणःफलंभोक्तव्यंइतिच तथाहंतूष्णींभवामियेना
हंनिरायासोकर्मासुखीस्यामितिकार्यकरणाश्रयंव्यापारोपरमंकृतंचसुखिलमात्मन्याध्यारोप्यन

करोमि किंच तूष्णींसुखमासइतिन्नभिमन्यतेलोकस्तत्रेदंलोकस्यविपरीतदर्शनापनयायाहभगवान्
कर्मण्यकर्मइत्यादि अत्रचकर्मकर्मैवसत्कार्यकरणात्प्रयंकर्मरहितोऽविक्रियआत्मनिसर्वैरध्यक्षतय
तःपंडितोप्यहंकरोमीतिमन्यतेऽतआत्मसमवेततयासर्वलोकप्रसिद्धेकर्मणि नदीकूलस्थेविवृद्ध
क्षेषुगतिंप्रतिलोम्यनाऽकर्मकर्माभावंयथाभूतंगत्यभावमिवदृक्षेषुयःपश्येत् अकर्मणिचकार्यक
रणव्यापारोपरमेकर्मवदात्मन्यध्यारोपितेतूष्णीमकुर्वन्सुखमासइत्यहंकाराभिसंबंधिहेतुत्वात्
तस्मिन्नकर्मणिचकर्मयःपश्येद्यएवंकर्माकर्मविभागज्ञःसबुद्धिमान्पंडितोमनुष्येषुसयुक्तो
योगीकृत्स्नकर्मकृच्चसोऽशुभान्मोक्षितःकृतकृत्योभवतीत्यर्थः अयंश्लोकोन्यथाव्याख्यातःके
श्चित्कथंनित्यानांकिलकर्मणामीश्वरार्थेऽनुष्ठीयमाणानांनतत्फलाभावादकर्मणितान्युच्यंतेगौ
ण्यावृत्त्या तेषांचाकरणमकर्मतच्चप्रत्यवायफलत्वात्कर्मोच्यतेगौण्येववृत्त्या तत्रनित्येकर्मण्य
कर्मयःपश्येत्फलाभावाद्यथाधेनुरपिगोरगोरुच्यतेक्षीराख्यफलेनप्रयच्छतीतितद्वत्तथानित्याकरणे
त्वकर्मणिकर्मयःपश्येन्नरकादिप्रत्यवायफलप्रयच्छतीति नेतच्चयुक्तंव्याख्यातं एवंज्ञानादशुभान्मो
क्षानुपपत्तेर्यत्तज्ज्ञात्वामोक्ष्यसेशुभादितिभगवतोक्तंबाध्येत कथं नित्यानामनुष्ठानादशुभात्स्या
न्नाममोक्षणंनतुतेषांफलाभावज्ञानान्नित्यानांफलाभावज्ञानमशुभमुक्तिफलत्वेनचोदितंनि

त्यकर्मज्ञानंवानचभगवतैवमुक्तं एतेनाकर्मणिकर्मदर्शीप्रत्युक्तं नत्यकर्मणिकर्मेतिदर्शीनंकर्त्तव्यतयेह
चोद्यते नित्यस्यकर्त्तव्यतामात्रंनचाकरणान्नित्यस्यप्रत्यवायोभवतीतिविज्ञानात्किंचित्फलंस्यान्
नापिनित्याकरणंज्ञेयतेनचोदितंनापिकर्माकर्मेतिमिथ्यादर्शीनादशुभान्मोक्षणंबुद्धिमत्वंयुक्ततो
हृत्स्नकर्मकृदित्यादिचफलमुपपद्यतेस्तुतिर्वामिथ्याज्ञानमेवहिसाक्षादशुभस्वरूपंकुतोन्यस्मा
दशुभान्मोक्षणं नहितमस्तमसोनिवर्त्तकंभवति ननुकर्मणियदकर्मदर्शनमकर्मणिचकर्मदर्शी
नंननतन्मिथ्याज्ञानंकिंतर्हिगौणंफलभावाभावनिमित्तं नकर्माकर्मविज्ञानादपिगौणात्फलस्या
श्रवणान्नापिश्रुतस्यान्यश्रुतेपरिकल्पनायांकश्चिद्दोषोलभ्यते स्वशब्देनापिशक्यंवक्तुंनित्यक
र्मणांफलंनास्यकरणाच्चतेषांनरकपातःस्यादितितत्रव्याजेनपरमामोहरूपेणकर्मण्यकर्मयः
पश्येदित्यादिनाकिं तत्रैवंव्याचक्षाणेनभगवतोवाक्यंलोकव्यामोहार्थंइतिव्यक्तंकल्पितंस्यात्
नचैतच्छ्रुतरूपेणवाक्येनरक्षणीयंवस्तुनापिन्यायांतरेणपुनःपुनरुच्यमानंवस्तुसुबोधंस्यादित्ये
वंवक्तुंयुक्तंकर्मण्येवाधिकारस्तइत्यत्रचस्फुटतरउक्तोर्थोनर्वक्तव्योभवति सर्वत्रचप्रशस्तंबोद्धु
व्यंचकर्त्तव्यमेवनिंनेप्रयोजनंवोद्धव्यमित्युच्यते नचमिथ्याज्ञानंबोद्धव्यंभवति तत्प्रत्युपस्थापितंवा
वस्त्वाभासं नापिनित्यानामकरणादभावात्प्रत्यवायभावोसत्तिरितिनासतोविद्यतेभावइतिकथमस

तःसज्जायेतइतिचअसतःसज्जन्मप्रतिषेधात्सतःसदुत्पत्तिंब्रुवतासेत्रैदेवहिसद्भवेत्सच्चासद्भवेत्स्वि
तंस्यात्तच्चायुक्तंसर्वप्रमाणविरोधात् नचनिष्फलंविद्ध्यात्कर्मशास्त्रंदुःखरूपत्वात्तदुःखस्यचबु
द्धिपूर्वकत्वाकार्यत्वानुपपत्तेस्तत्करणेचनरकपाताभ्युपगमेनर्थायैवोभयथापिकरणेऽकरणेच
शास्त्रकल्पितंस्यात्स्वाभ्युपगमविरोधश्चनित्यंनिष्फलंकर्मेत्यभ्युपगम्यतेमोक्षायेतिब्रुवतः तस्मा
त्यथोक्तएवार्थःकर्मेइत्यादि तथाचव्याख्यातोस्माभिःश्लोकः १६ तदेतत्कर्मआदावकर्मादि

यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितंबुधाः १९

दर्शनंस्तूयते यस्येति यस्ययथोक्तदर्शिनःसर्वेयावंतःसमारंभाःसर्वाणिकर्माणिसमारभ्यंत
तिसमारंभाः कामसंकल्पएवकवर्जिताः कामस्तत्कारणेश्वसंकल्पैःवर्जिताः ज्ञानाग्निदग्धकर्मा
णं मुधैवचेष्टामात्राअनुष्ठीयंतेप्रवृत्तेनचेलोकसंग्रहार्थेनिवृत्तेनचेज्जीवनमात्रार्थंतज्ञानाग्नि
दग्धकर्माणंकर्मादावकर्मादिदर्शिनंज्ञानंतदेवाग्निस्तेनज्ञानाग्निनादग्धानिशुभाशुभलक्षणा
निकर्माणियस्यतमाहुःपरमार्थतःपंडितंबुधाःब्रह्मविदःज्ञानिनः १९ शांकरायनमोनमः

यस्त्वकर्मादिदर्शीसोऽकर्मादिदर्शीनादेवनिष्कर्मासन्यासीजीवनमात्रार्थचेष्टःसकर्मणिनप्रवर्त्तते यद्यपिप्रा
ग्विवेकतःप्रवृत्तःयस्तुप्रारब्धकर्मासन्नुत्तरकालमुत्पन्नात्मसम्यक्दर्शनःस्यात्सकर्मणिप्रयोजनम
पश्यन्सासाधनंकर्मपरित्यजत्येवसकुतश्चिन्निमित्तात् कर्मपरित्यागासंभवेसतिकर्मणितत्फलेच
संगरहिततयास्वप्रयोजनाभावाल्लोकसंग्रहार्थंपूर्ववत्कर्मणिप्रवृत्तोपिनैवकिंचित्करोतिज्ञानाग्निदग्धक

त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः कर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसः २०

र्मत्वात्तदीयंकर्माकर्मैवसंपद्यतइत्येतमर्थंदर्शयिष्यन् त्यक्त्वेति त्यक्त्वाकर्मस्वमिमानंफलासंगंचयथो
क्तेनज्ञानेननित्यतृप्तोनिराकांक्षोविषयेषित्यर्थोनिराश्रयआश्रयरहितआश्रयोनामयदाश्रित्यपुरुषार्थं
सिसाधयिष्यति दृष्टादृष्टेष्टफलसाधनाश्रयरहितइत्यर्थः तेनैवंभूतेनस्वप्रयोजनाभावात्ससाधु
नंकर्मत्यक्त्वेत्तंमेवेतिप्राप्ततोनिर्गमासंभवात्लोकसंग्रहचिकीर्षयाविष्टविगर्हणापरिजिहीर्षयावापूर्व

यःपुनःपूर्वोक्तविपरीतप्रागेवकर्मारंभात्ब्रह्मणिसर्वोत्तरेप्रत्यगात्मनिनिःक्रियेसंजातात्मदर्शनःसदृष्टा
दृष्टविषयाशीर्विवर्जिततयादृष्टार्थकर्मणिप्रयोजनमपश्यन्त्सशरीरयात्रामा
त्रचेष्टोयतिर्ज्ञाननिष्ठोमुच्यतइत्येतदर्थंदर्शयितुमाह निराशीरिति निराशीःनिर्गताआशिषो
यस्मात्सनिराशीः यतचित्तात्मायतचित्तमंतःकरणंआत्मावात्मकार्यकरणसंघातस्तोऽहंभावपि
यतोसंयतोयेनसयतचित्तात्मा त्यक्तसर्वपरिग्रहः त्यक्तःसर्वपरिग्रहोयेनसत्यक्तसर्वपरि
ग्रहः शारीरंशरीरस्थितिमात्रप्रयोजनंकेवलंतत्राप्यभिमानवर्जितंकुर्वन्नाप्नोतिकिल्बिषम

निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषं २१

निष्टंरूपंयेषांतेपापंधर्मंचधर्मोपिमुमुक्षोरनिष्टरूपत्वात्किल्बिषमेवशारीरंकेवलंकर्मेत्यत्रकिंशारी
रनिर्वर्त्यंशारीरंकर्माभिप्रेतमाहोस्वित्तुशरीरस्थितिमात्रप्रयोजनंशारीरंकर्मेति किंचातोयदिशरीर
निर्वर्त्यंशारीरंकर्म यदिवाशरीरस्थितिमात्रप्रयोजनंशारीरमित्यच्यते यदाशरीरनिर्वर्त्यंकर्म
शारीरमभिप्रेतंस्यात्तदादृष्टादृष्टप्रयोजनंकर्मप्रतिषिद्धमपिशारीरेणकुर्वन्नाप्नोतिकिल्बिष
मित्यपिब्रुवतोऽप्राप्तप्रतिषेधःप्रसंगः शारीरंकर्मकुर्वन्नितिविशेषणात्केवलाद्दृष्टप्रयोज्यवा

ज्ञानसनिर्वर्त्यंकर्मविधिप्रतिषेधविषयंधर्माधर्मंवाद्यंकुर्वन्नाप्नोतिकिल्बिषमित्यपिउक्तंस्यात्त
त्रापिवाज्ञानसाध्यांविहितानुष्ठानपक्षेकिल्बिषप्राप्तिवचनंविरुद्धमापद्यतप्रतिषिद्धसेवापक्षेपि
भूतार्थानुवादमात्रमनर्थकंस्यात् यदापुनःशारीरस्थितिमात्रप्रयोजनंशारीरंकर्माभिप्रेतंभवे
त् तदादृष्टादृष्टप्रयोजनंकर्मविधिप्रतिषेधगम्यंशारीरवाङ्मनोनिर्वर्त्यमन्यदकुर्वंस्तैरेवशा
रीरादिभिःशारीरस्थितिमात्रप्रयोजनंकेवलाद्प्रयोगादहंकारोत्यभिमानवर्जितःशारी
रादिचेष्टामात्रंलोकदृष्ट्याकुर्वन्नाप्नोतिकिल्बिषमेवंभूतस्यपापशब्दाद्यंकिल्बिषप्राप्तंसं
भवात्किल्बिषंसंसारंनप्राप्नोतिज्ञानाग्निदग्धसर्वकर्मत्वाद्प्रतिबंधेनेनमुच्यतएवेतिपू
र्वोक्तसम्यक्दर्शनफलानुवादएवेषः एवंशारीरंकेवलंकर्मेत्यस्यार्थस्यपरिग्रहेनिरवद्यं
भवति २९

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

त्यक्तसर्वपरिग्रहस्ययतेरन्नादेः शरीरस्थितिहेतोः परिग्रहस्याभावाद्याचनादिनाशरीरस्थितेःकर्त्तव्यता
यात्रामात्रायामप्याचित्तमसंक्लृप्तमुपपन्नंयदृच्छयेत्यादिनावचनेनानुज्ञातंयतेः शरीरस्थितिहेतोरन्नादेः
प्राप्तिद्वारमाविष्कुर्वन्नाह